नं० ४३५८-घ

~~मीमांसान्यायप्रकाशः~~

नं० ध३पध -घ

पत्राणि ४६

ॐ श्रीगणेशाय नमः यत्कृपालेशमात्रेण पुरुषार्थचतुष्टयं प्राप्यते तमहं वंदे गोविंदं भक्तवत्सलं १ अनंतगुणसंप
न्नमनंतभजनप्रियं अनंतरूपिणं वंदे गुरुं मानेंद्ररूपिणं २ इह खलु परमकारुणिकेन भगवता जैमिनिमहर्षिणा अ
थातो धर्मजिज्ञासेत्यादिना द्वादशलक्षण्यां धर्मो विचारितः तत्र वेदेन प्रयोजनमुद्दिश्य विधीयमानोर्थो धर्मः यथा
यागादिः स हि यजेत स्वर्गकाम इत्यादिवाक्येन स्वर्गमुद्दिश्य विधीयते तथाहि यजेतेत्यत्रांशद्वयं यजिधातुः प्रत्य
यश्च तत्र प्रत्ययेप्यंशद्वयं आख्यातत्वं लिङ्त्वं च आख्यातत्वं दशसु लकारेषु विद्यते लिङ्त्वं पुनः केवले लिङ्ये
व तत्राख्यातलिङ्त्वाभ्यां भावनैवोच्यते भावना नाम भवितुर्भवनानुकूलो भावकव्यापारविशेषः सा च द्विधा शाब्दी
भावना आर्थी भावना चेति तत्र पुरुषप्रवृत्त्यनुकूलो व्यापारविशेषः शाब्दी भावना सा च लिङ्त्वांशेनोच्यते लिङ्श्र
वणे अयं मां प्रवर्तयति मत्प्रवृत्त्यनुकूलव्यापारवानयमिति नियमेन प्रतीयमानत्वात् यद्यस्मात्प्रतीयते तत्तस्य वाच्यं
यथा गोशब्दस्य गोत्वं स च प्रवृत्त्यनुकूलो व्यापारविशेषो लौकिके पुरुषनिष्ठोभिप्रायविशेषः वेदे तु पुरुषाभावाल्लिङा
दिशब्दनिष्ठ एव न हि वेदः पुरुषनिर्मितः वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकं वेदाध्ययनसामान्यादधुनाध्ययनं
यथेत्यादिना वेदापौरुषेयत्वस्य साधितत्वात् यः कल्पः स कल्पपूर्वः इति न्यायेन संसारस्यानादित्वादीश्वरस्य च सर्वज्ञ
त्वादीश्वरेणागतकल्पीयं वेदमस्मिन्कल्पे स्मृत्वोपदिष्टमित्येतावतैवापौरुषेयत्वे प्रामाण्ये तेनार्थमुपलभ्य रचितत्वकल्प

नानुपपन्नेश्च तत्र पुरुषाभावात् लिङादिशब्दनिष्ठैव सा अत एव शाब्दीभावनेति व्यपदिश्यते सा च शाब्दीभावना
प्यंशत्रयमपेक्षते साध्यं साधनमितिकर्तव्यतां च तत्र साध्याकांक्षायां वक्ष्यमाणप्राशस्त्योपेतार्थीभावना साध्यत्वेन सं
बध्यते एकप्रत्ययगम्यत्वेन समानाभिधानश्रुतेः यद्यपि संख्यादीनामपि एकप्रत्ययगम्यत्वं समानं तथापि अ
योग्यत्वान्न तेषां भाव्यत्वेनान्वयः करणाकांक्षायां लिङादिज्ञानं करणत्वेन संबध्यते तस्य च करणत्वं भावनो
त्पादकत्वेन लिङादिज्ञाने हि प्राप्ते भावना भाव्यार्थभावनां निर्वर्तयति कुठार इव छेदनं अन्मौसन्निकर्षस्येव रूपा
दिज्ञाने सन्निकर्षात् प्राक् रूपज्ञानस्येव लिङादिज्ञानात् प्राक् शाब्द्यर्थभावनाया अभावप्रसंगात् किं तु भावनाभा
व्यनिर्वर्तकत्वेन लिङादिज्ञानस्य करणत्वेनान्वयः इतिकर्तव्यताकांक्षायां प्राशस्त्यज्ञानं इतिकर्तव्यतात्वेन सं
बध्यते तच्च प्राशस्त्यज्ञानं वायुर्वै क्षेपिष्ठा देवतेत्याद्यर्थवादैर्जन्यते तेऽर्थवादाः स्वार्थप्रतिपादने प्रयोजनमल
भमानाः लक्षणया प्राशस्त्यं प्रतिपादयन्ति स्वार्थमात्रपरत्वे आनर्थक्यप्रसंगात् न चेष्टापत्तिः अध्ययन
विध्युपात्तत्वेनानर्थक्यानुपपत्तेः तथा हि स्वाध्यायोऽध्येतव्य इति अध्ययनविधिः सकलस्य वेदस्याध्ययनकर्त
व्यतां बोधयन् सर्वो वेदः प्रयोजनवदर्थपर्यवसायी इति सूचयति निरर्थकस्याध्ययनानुपपत्तेः स च वेदः विधि
मंत्रनामधेयनिषेधार्थवादात्मकः तत्र विधिः प्रयोजनवदर्थविधानेनार्थवान् स चाप्राप्तमर्थं विधत्ते यथाग्निहो

दे २

त्रं जुहुयात्स्वर्गकाम इति विधिरप्राप्तं प्रयोजनवद्धोमं विधत्ते अग्निहोत्रहोमेन स्वर्गं भावयेदिति यत्र तु कर्म प्रकारान्त
रेणाप्राप्तं तत्र तदुद्देशेन गुणमात्रं विधत्ते यथा दध्ना जुहुयादित्यत्र होमस्याग्निहोत्रं जुहोतीत्यनेन प्राप्तत्वाद्धोमोद्देशे
न दधिमात्रविधानं दध्ना होमं भावयेदिति यत्र तूभयमप्राप्तं तत्र विशिष्टं विधत्ते तदुक्तं न चेदन्येन शिष्टा इति शि
ष्टा उपदिष्टा इत्यर्थः यथा सोमेन यजेतेत्यत्र सोमयागयोरप्राप्तत्वात्सोमविशिष्टयागविधानं सोमवता यागेनेष्टं
भावयेदिति न चोभयविधाने वाक्यभेदः विशिष्टस्यैकत्वात् विशिष्टविधौ च मत्वर्थलक्षणा यथा सोमपदेन
मत्वर्थो लक्ष्यते सोमवतेति न हि मत्वर्थलक्षणां विना सोमस्यान्वयः संभवति यदि तावत्सोमयागयोरैक्यं रूपेण
भावनायां करणत्वेनैवान्वयः सोमेन यागेनेष्टं भावयेदिति तत उभयविधाने वाक्यभेदः सोमस्य यागवत्फल
भावनायां करणत्वेन प्रत्ययेऽपि विरोधश्च न हि सोमो यागो भवितुमर्हतीत्याख्यातोपात्तस्य यागार्थत्वानुपपत्तिश्च या
गद्व्यानुपपत्तिश्च प्रत्ययवाच्यफलभावनायाः समानपदोपात्तेन यागेन करणाकांक्षायां निवृत्तत्वेन भिन्नपदो
पात्तस्य सोमस्य करणत्वेनान्वयानुपपत्तिश्च स्यात् यदि च वैयधिकरण्येनान्वयः तत्र न तावद्यागेन सोमममि
त्यन्वयः समानपदोपात्तत्वात् प्रत्ययवाच्यफलभावनाकरणत्वेनान्वितस्य यागस्य सोमकर्मभावनानुपप
त्तेः यागस्य सोमार्थत्वापातश्च न चेष्टापत्तिः अदृष्टकल्पनापत्तेः न हि यागस्य सोमार्थत्वं दृष्टद्वारेण संभवति व्रीहि

राम. २

घववद्यातेनैव यागेन सोमे कस्यचित् दृष्टस्याजननात् अतएव न तावत् सोमे किंचिददृष्टं जननीयं प्रोक्षणेनैव व्रीहि
षु तथा यागस्य सोमार्थत्वे फलभावनायां सोमस्य करणत्वेनान्वयो वक्तव्यः करणत्वं च भावनाभाव्यनिर्वर्तकत्वे
नेत्युक्तं न च सोमो ऽदृष्टमंतरेण फलं जनयितुं समर्थः ग्रहैर्जुहोतीति वाक्यविहितहोमेन तस्य भस्मीभावात् अतोऽदृ
ष्टद्वारापातात् यागस्य सोमार्थत्वमिति न यागेन सोमं भावयेदित्यन्वयः संभवति करणत्वेनोपस्थितस्य सोमस्य
साध्यत्वेनान्वयानुपपत्तेश्च अथ सोमेन यागं भावयेदित्यन्वयस्तत्र यद्यपि सोमस्य यागार्थत्वात् यागनिर्वृत्ति दृष्ट
मेव प्रयोजनं लभ्यते इति नादृष्टद्वारापत्तिः नापि करणत्वेनोपस्थितस्य सोमस्य साध्यत्वेनान्वयानुपपत्तिः करणत्वेनै
वान्वयात् तथाप्यप्राप्तत्वाद्भावनाकरणत्वेनोपस्थितस्य यागस्य साध्यत्वेनान्वयानुपपत्तिस्तदवस्थैव ननु यजे
तेत्यत्र यागस्य न करणत्वेन नापि साध्यत्वेनोपस्थितिः तद्वाचकतृतीयाद्यभावात् किंतु भावनायां यागसंबंधमात्रं
प्रतीयते यागस्य च भावनासंबंधः करणत्वेन साध्यत्वेन च संभवति तत्र करणत्वं प्राप्तमादाय फलसंबंधः साध्यत्वं
प्राप्तमादाय गुणकर्मसंबंधः स्यादिति चेन्नैवं यद्यपि भावनया यागस्य संबंधमात्रं प्रतीयते तथापि करण
त्वेनोपस्थितिदशायां न साध्यत्वेनोपस्थितिः संभवति विरोधात् तदवश्यं यागेन स्वर्गं भावयेदिति करणत्वेनान्व
ये सति पश्चात् सोमेन यागं भावयेदिति साध्यत्वेनान्वयो वक्तव्यः तत्र च वाक्यभेदः न च प्रत्ययाभिहितभावनास्वद्

पृ ३

येयागस्वरूपमात्रमन्वेतीतिवक्तव्ये युक्तं कारकाणामेव क्रियान्वयात् तत्सिद्धं सोमस्य न यागसामानाधिकरण्येन वैयधिकर
ण्येन वान्वयः संभवति ननु यजेतेत्यत्र प्रत्ययाभिहितभावनायाः करणाकांक्षायां यथा यागः करणत्वेनान्वेति तथेतिकर्त
व्यताकांक्षायां सोमस्येतिकर्तव्यतात्वेन भावनायामेवान्वयोऽस्तु किं मत्वर्थलक्षणयेति चेन्न सोमेनेति तृतीयया करण
त्ववाचिन्या सोमस्येतिकर्तव्यतात्वानभिधानात् तत्र यदि इतिकर्तव्यतात्वे लक्षणोच्यते ततो वरं सोमपदे एव प्रकृ
तिभूते मत्वर्थलक्षणा गुणोऽभ्युपायकल्पनेति न्यायात् अथ वेदो वा प्रायदर्शनादित्यधिकरणोक्तासंजातविरोधित्वन्या
येन प्रत्ययस्यैव लक्षणेति चेन्न तथापि सोमस्येतिकर्तव्यतात्वेनान्वयानुपपत्तिः सिद्धस्य वस्तुन इतिकर्तव्यतात्वाभा
वात् क्रियाया एव इतिकर्तव्यतात्वात् द्रव्यस्य केवलं संगत्वात् अत एव इतिकर्तव्यताभावाद् द्रव्यस्य प्रकरणाग्रहणाय
थाहुः नावीतरक्रियायोगाद् इति वाक्योपकल्पितान् गुणाद्रव्यैकदेशभावेऽर्थं हन्ति प्रकृताः क्रियाः इति तदितदग्रे वक्ष्या
मः किं च सोमेन यजेतेति हि यागस्योत्पत्तिवाक्यं नाधिकारवाक्यं ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यस्याधिकारवा
क्यत्वात् उत्पत्तिवाक्ये च नेतिकर्तव्यताकांक्षा इष्टविशेषाकांक्षाकलुषितत्वेनेतिकर्तव्यताकांक्षाया अस्पष्टत्वमनु
त्थानात् तत्सिद्धं सोमस्य नेतिकर्तव्यतात्वेन भावनायामन्वयः तस्माद्विशिष्टविधावन्वयानुपपत्त्यावश्यं मत्वर्थलक्ष
णेति न चैवमपि सोमेन यजेतेत्यत्र न विशिष्टविधानं गौरवात् मत्वर्थलक्षणापातात् किं तु द्व्यात्मजहातीतिवत् गुण

राम. ४

गुणमात्रविधानमस्तु विधिशक्तेर्गुणोपसंक्रमात् यथाहुः सर्वत्राख्यातसंबद्धे श्रूयमाणे पदान्तरे विधिसानुप
संक्रांतेः स्याद्धातोरनुवादतेति न च यागस्याप्राप्तत्वान्न तदुद्देशेन सोमविधानमिति वाच्यं ज्योतिष्टोमेन स्वर्गकामो
यजेतेत्यनेन यागस्य प्राप्तत्वात् न चास्याधिकारविधित्वेन नोत्पत्तिविधित्वमिति वाच्यं उद्भिदा यजेत पशुकामः
इतिवदेकस्यैवोभयविधित्वोपपत्तेः एवं च सोमेन यजेतेत्यत्र न मत्वर्थलक्षणा यदि तत्र विशिष्टविधानं स्यात्तदा
न्यथानुपपत्त्या मत्वर्थलक्षणा स्यात् ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र तु यागविधानेऽपि न मत्वर्थलक्षणा
न तावदेतस्मिन्वाक्ये ज्योतिष्टोमेन यागेन स्वर्गं भावयेदिति सामानाधिकरण्येनैव नामपदस्यान्वयात् नापि
सोमेन यजेतेत्यत्र यागोद्देशेन सोमविधानात्सोमेन यागं भावयेदिति ननु अनुवादेऽप्यस्ति मत्वर्थलक्षणा
अत एवोक्तं विधाने वानुवादे वा यागः करणमिष्यते तत्समीपे तृतीयान्तस्तद्धावित्वेन मुच्यतीति अतश्च वि
शिष्टविधावित्र गुणविधावप्यस्त्येव मत्वर्थलक्षणेति चेन्मैवं गुणान्वयानुपपत्त्या हि मत्वर्थलक्षणाङ्गीक्रिय
ते यदा च भावनायां धात्वर्थस्य करणत्वेनान्वयस्तदान्वयानुपपत्त्यभावात्त्कर्तव्या गुणविधौ च न धात्वर्थस्य करण
त्वेनान्वयो मानाभावात् न हि दध्ना जुहोतीत्यत्र होमस्य करणत्वं श्रूयते तद्वाचकतृतीयाद्यभावात् कल्प्यत इति चे
न्न गुणस्य तत्र विधित्सितत्वेन साध्याकांक्षायां साध्यत्वकल्पनाया एवोचितत्वात् दध्ना होमं भावयेदिति न चायम

त्तिनियमो भावनायां धात्वर्थस्य करणत्वेनैवान्वयो न प्रकारांतरेणेति षष्ठाद्यस्वर्गपदानुपपत्त्यानापत्तेः षष्ठाद्ये दियजेत स
र्गकामः इत्यादौ प्रत्ययवाच्यायां वक्ष्यमाणार्थभावनायां समानपदश्रुत्या यागस्य भाव्यत्वमाशंक्य पुरुषार्थत्वेन परिह
तं यदि च धात्वर्थस्य करणत्वेनैव भावनायामन्वयस्तदा भाव्यत्वशंकैव नोदेतीति धात्वर्थप्राधान्यमधिकरणमापद्येत
किंच वाजपेयाधिकरणे तत्र संबंधशंका परिहृता: धात्वर्थस्य करणत्वेनैवान्वये तत्र संबंधशंकैव न स्यात्। तंत्र
संबंधशंकापरिहारो च व्याख्यातो किंच धात्वर्थस्यानकरणत्वेनैवान्वयः गुणकामाधिकरणे आश्रयत्वेन धात्वर्था
न्वयस्योक्तत्वात्। तथा हि दध्नेन्द्रियकामस्य जुहुयादित्यत्र न तावद्धोमो विधीयते तस्य वचनांतरेण विहितत्वात्। ना
पि होमस्य फलसंबंधः गुणस्य पदानर्थक्यापत्तेः नापि गुणसंबंधो विधीयते फलपदानर्थक्यापातात्। नाप्युभयसंबंधो
विधीयते प्राप्ते कर्मण्यनेकविधाने वाक्यभेदापत्तेः। यथाहुः प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः। अप्राप्ते तु
विधीयंते बहवो ऽप्येकयत्नत इति। अत्र चक्कभपदवत् गुणोत्पलत्वाप्येकोद्देशेनानेकविधाने वाक्यभेदात्। अ
तएव ग्रहैकत्वाधिकरणे ग्रहं संमार्ष्टीत्यत्र ग्रहोद्देशेन एकत्वसंमार्गविधौ वाक्यभेदात् ग्रहैकत्वमविवक्षितमि
त्युक्तं रेवत्यधिकरणे च एतस्यैव रेवतीषु वारवंतीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेतेत्यत्र वारवंतीय
स्य रेवतीसंबंधे अग्निष्टोमसामसंबंधे फलसंबंधे च विधीयमाने वाक्यभेदाद्भावनोपसर्जनभावंनांतर विधीय

तदप्युक्तं तस्मात्प्राप्ते होमे नोभयविधानं संभवति नापि होमांतरं विधीयते गौरवप्रसंगात् अतो न दानाप्रकृतप्रसं
गात् मत्वर्थलक्षणाप्रसंगाच्च नापि दध्येव केवलं करणत्वेन विधीयत इति युक्तं केवलस्य व्यापारानाविष्टस्य क
रणत्वानुपपत्तेः कर्तृव्यापारव्याप्यत्वनियमात् करणत्वस्य किं तर्हि विधीयत इति चेत् दध्नेति तृतीयया उपात्तेद
धिकरणत्वे फलभावनायां करणत्वेन विधीयते प्रत्ययार्थत्वेन दध्नोऽपि तस्य प्राधान्यात् एवं च दधिकरणत्वेनें
द्रियं भावयेदिति वाक्यार्थः करणं च प्रतियोगिकमित्यपेक्षायां संनिधिप्राप्तो होमः आश्रयत्वेन संबध्यते त
त्प्रसिद्धो धात्वर्थस्याश्रयत्वेनान्वयः प्रकृतमप्यसामः न सिद्धं धात्वर्थस्य न करणत्वेनैवान्वय इति किं तर्हि
कश्चित् करणत्वेन कश्चित् साध्यत्वेन कश्चिदाश्रयत्वेनेति गुणविधौ च साध्यत्वेनैवान्वयः संभवतीति न मत्वर्थलक्ष
णाया प्रयोजनं किंच गुणविधौ मत्वर्थलक्षणायां गुणस्य धात्वर्थयोगित्वे किं मानमिति वक्तव्यं न तावत् श्रुतिः मत्व
र्थलक्षणायां तृतीयाश्रुतेर्मत्वर्थस्यैवांगत्वे मानं स्यात् न गुणस्यांगत्वे समभिव्याहारात्मकं वाक्यमिति चेत्
न किं स्वतंत्रमेव मानं लिंगश्रुती कल्पयित्वा वा नाद्यः बलाबलाधिकरणविरोधात् न द्वितीयो वाक्ये लिंगश्रुती
कल्पयित्वा अंगत्वे मानमित्युक्तं द्वितीये प्रथमं दोषश्रुतिसमन्वयश्रुत्यंतरकल्पने तस्याप्यवश्यमाहृतिकल्पनेऽस्य
धाश्रयासः समाश्रितः स्यात् विशिष्टविधौ चाभावात् तदाश्रयणे किंच भवतश्रुत्यंतरकल्पनं तथापि तस्य हृष्टतः

उ. ५

प्रयत्त एव विधिः धात्वर्थांगत्वेन गुणो विधीयते उत कल्पितविध्यन्तरं कल्पितमिति चेन्न श्रुतविधेयत्वेऽर्थेनायत्तेः ।
नहि तेन तदा गुणो विधीयते कल्पितविध्यन्तरांगीकारात् नापि धात्वर्थः तस्य वचनान्तरेण विहितत्वात् अथ
श्रूयमाण एव विधिः कल्पितश्रुतिसहकृतो धात्वर्थांगत्वेन गुणं विधत्ते इति चेत् तर्हि तत्र कथं धात्वर्थस्या
न्वयः करणत्वेनेति चेत् नान्वयानुपपत्तेः नहि संभवति दध्ना होमेनेति वान्वयः साध्यत्वेनैवान्वयो दध्ना होमं
भावयेदिति चेन्न तथा सति अनुवादेऽपि धात्वर्थः करणत्वेनैवान्वितो यैतदपेक्षितं स्यात् विवक्षितत्वाकार्थ
स्याविनैव मत्वर्थलक्षणायामंगीकृतः स्यात् तस्मान्न गुणविधौ मत्वर्थलक्षणायत्न विधानेनानुवादवेति वार्त्ति
कं तत्सतीतिमवलंब्यन वक्तव्यमिति तथा हि यावद्भिः अग्निहोत्रं जुहुयादिति वाक्यं नालोच्यते केवलं दध्ना जुहोती
ति वाक्यमालोच्यते तदा पण्णांघन्यायेन होमस्याभावार्थत्वे ज्ञानतां प्रतिपदाधिकरणावासनावासितानां च
भवत्येवता दृश्वीमतिः यद्दधिमता होमेनेष्टं भावयेदिति प्रतिपदाधिकरणे हि सोमेन यजेतेत्यादिषु कि
गुणधात्वर्थयोः फलभावनाकरणत्वेनान्वयस्तत्पक्षस्यैवेति सिद्धे हि यप्रधानसंबंधलाभाद्धि निगमना
विरहाच्च सर्वेषां फलभावनाकरणत्वेनान्वयमाश्रित्य कल्लान्यवादे कस्यैव फलभावनाकरणत्वमित्युक्तं भा
वनाकरणत्वं हि भावनाभावनिर्वर्तकतया भाव्यं च स्वर्गादिनादृष्टमंतरेणेति अनेकेषां करणत्वे अनेका

ऽदृष्टकल्पनाप्रसंगात् तस्मादेकस्यैव करणत्वं यदा त्वेकस्यैव तदापि किं द्रव्यगुणयोः फलभावनाकरणत्वेऽ
तथात्वर्थस्येति भावार्थाधिकरणे संदिग्धे द्रव्यगुणयोरेव भावनाकरणत्वं भूतं भाव्यो यो यदि स्यात् इति न्या
यादित्याशंक्य धात्वर्थस्यैव भावनाकरणत्वं पदश्रुतेर्बलीयस्त्वादित्युक्तं अतश्च सिद्धमेतद्वाक्यांतराणां लोच
नदशायां गुणविधानविधानात्वर्थस्य करणत्वाशंकायां गुणपदे मत्वर्थलक्षणेति यदा त्वग्निहोत्रं जुहोतीति
होमविधायके वाक्यांतरमालोच्यते तदा होमस्य वाक्यांतरेणैव विहितत्वात् तदुद्देशेन गुणमात्रं विधीयत
इत्यालोचनान्न मत्वर्थलक्षणेति अत एवोक्तं पार्थसारथिमिश्रैराघाराग्निहोत्राधिकरणे फलतो गुणविधिर
यं न प्रतीतितः इति यद्वैतद्वार्तिके अधिकारविषयमभिप्रायेणोद्भिदा यजेतेत्यादीनामधिकारात् तत्र हि यागो वि
धीयतां उत त्विति वाक्यभिन्नो वानूद्यतां उभयथापि धात्वर्थस्य करणत्वेनान्वयात् तृतीयांतस्य तद्वाचित्वं अन्य
थान्वयानुपपत्तेरिति तस्माद्गुणविधौ विनापि लक्षणां यागान्वयोऽनुपपत्तेर्न मत्वर्थलक्षणेति अतश्च सोमेन
यजेतेत्यत्र न विशिष्टविधानं किंतु गुणमात्रविधानं यागस्तु ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यस्मिन्वाक्ये वि
धीयत इत्येव युक्तं अन्यथा मत्वर्थलक्षणापत्तेरिति अत्रोच्यते यद्यपि यागोद्देशेन सोमविधौ न मत्वर्थलक्ष
णा तथापि यागस्याप्राप्तत्वात्सोमेन यजेतेत्यत्र न यागोद्देशेन सोमविधानं संभवति तत्र ज्योतिष्टोमेनेत्यादिना

प्राप्तत्वात् तदुद्देशेन गुणमात्रं विधीयत इति वाच्यं तस्याधिकारविधित्वेनोत्पत्तिविधित्वानुपपत्तेः कर्मस्वरूपमा
त्रबोधको विधिरुत्पत्तिविधिस्तेन च विहितस्य कर्मणः फलविशेषसंबंधमात्रं अधिकारविधिना क्रियते फल
विशेषसंबंधबोधकस्य अधिकारविधित्वात् यथाग्नेयोष्टाकपालो भवतीत्येतद्विधिविहितस्य कर्मणः फ
लविशेषसंबंधमात्रं दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति वाक्यं विधत्त इति तस्याधिकारविधित्वेनोत्पत्तिविधि
त्वं स्यादेतत् दर्शपूर्णमासाभ्यामित्यस्योत्पत्तिविधित्वं संभवति आग्नेयोष्टाकपाल इत्यादिवाक्यानर्थक्याप
त्तेः न हि तेन तदा कर्म विधीयते तस्य तदा दर्शपूर्णमासाभ्यामित्यनेन विहितत्वात् नापि गुणविधानं संभव
ति प्रथमकर्मणि अनेकगुणविधाने वाक्यभेदापत्तेः अत आग्नेयोष्टाकपाल इत्यस्योत्पत्तिविधित्वं दर्शपूर्णमा
साभ्यामित्यस्य चाधिकारविधित्वं युक्तं ज्योतिष्टोमेनेत्यस्य तु अधिकारविधेरुद्भिदा यजेत पशुकाम इत्यादि
वदुत्पत्तिविधित्वेऽपि स्वीक्रियमाणे न कस्यचिदानर्थक्यं सोमेन यजेतेत्यस्य गुणविधित्वात् यागोद्देशेन सो
ममात्रविधानात् न वाक्यभेद इति चेन्नैवं यद्यपि सोमेन यजेतेत्यत्र न वाक्यभेदस्तथापि ज्योतिष्टोमेनेत्यस्मि
न्वाक्ये कर्मस्वरूपे तस्य फलसंबंधे विधीयमाने गौरवलक्षणो वाक्यभेदोऽस्त्येव सोमेन यजेतेत्येतद्वाक्यविहि
तकर्मणः फलसंबंधमात्रविधाने लाघवात् तदभावः उद्भिदा यजेतेत्यत्र तु वचनांतरभावेन गत्या तदा श्र

यद्येनं च सोमेन यजेतेत्यत्राधिकर्मस्वरूपे गुणे च विधीयमाने वाक्यभेदः स्यादिति वाच्यं श्रूयमाणेन विधि
ना गुणस्याविहितत्वात् विशेषणविधेरार्थिकत्वात् सर्वत्र हि विशिष्टविधौ विशेषणविधिरार्थिकः ज्योतिष्टो
मेनेत्यस्य तु उत्पत्तिविधित्वे कर्मस्वरूपं फलसंबंधश्चेति उभयं श्रूयमाणेनैव विधिना विधातव्यमिति द्वैगौ
रवलक्षणो वाक्यभेदः यथाहुः श्रोतव्यापारनानात्वे शाब्दानामपि गौरवं एकोक्त्यवसितानां तु नार्थात्तेषां
विरुद्धता इति न च सोमेन यजेतेत्यस्योत्पत्तिविधित्वेऽपि न वाक्यभेदस्तथापि मत्वर्थलक्षणा स्यादेवेति
वाच्यं तस्याः स्वीक्रियमाणत्वात् लक्षणातो वाक्यभेदस्य जघन्यत्वात् लक्षणादिपददोषो वाक्यभेदस्तु वाक्यदो
षः पदवाक्ययोर्मध्ये पदस्यैव दोषकल्पना युक्ततरत्वात् गुणे त्वन्याय्यकल्पनेति न्यायात् अत एव ज्ञातस्व
त्रं कृत्स्नं केवलेनाग्निनादधीतेत्यत्राधानानुवादेन ज्ञातस्य त्रत्वकृत्स्नकेवलत्व विधाने वाक्यभेदात्तदन्वयाभ्यासव
स्या विशेषणत्वात् उक्तं तस्माद्वाक्यभेदप्रसक्तौ लक्षणैव स्वीकार्या तस्मात्सोमेन यजेतेत्ययमेवोत्पत्तिविधि
नैज्योतिष्टोमेनेत्यस्य गौरवलक्षणवाक्यभेदापत्तेः किं च सोमेन यजेतेत्यत्र यागविधाने श्रुत्यर्थविधानं स्या
त् गुणविधाने तु वाक्यार्थविधानं तत्र श्रुत्यर्थविधानसंभवत्यप्युक्तं यथाहुः वाक्यार्थविधिरन्याय्यः श्रु
त्यर्थविधिसंभवे इति वाक्यार्थः पदान्तरार्थः श्रुत्यर्थः ज्योतिष्टोमेनेत्यत्रापि फलोद्देशेन यागस्यैव विधानान्न वा

पु
७

कार्यविधानेन तदुत्पत्तिविधित्ववादिनापि तदङ्गीकार्यं तस्माज्ज्योतिष्टोमेनेत्ययमधिकारविधिरेव अपि च कर्म
स्वरूपविधिस्तत्र सौकार्यो यत्र कर्मणो रूपमुपलभ्यते यागस्य च द्वे रूपे द्रव्यं देवता चेति सोमेन यजेतेत्यत्र यद्यपि
देवता नोपलभ्यते सोमयागस्याव्यक्तत्वात् अव्यक्तत्वे च स्वार्थचोदितदेवताराहित्यं न तु देवताराहित्यमात्रं ऐन्द्र
वायव्यं गृह्णातीत्यादिवाक्यविहितग्रहणार्थं देवतानां सत्त्वात् ग्रहणार्थैरपि देवताभिः प्रसंगतो यागोपकारस्य
क्रियमाणत्वात् तथापि द्रव्यमुपलभ्यत एवं तेनापि यागस्वरूपं ज्ञातं प्राकमेव ज्योतिष्टोमेन स्वर्गकामो यजे
तेत्यत्र न द्रव्यं देवता वा श्रूयते अतस्तस्योत्पत्तिविधित्वे यागविशेषज्ञानं यागसामान्यस्याविधेयत्वाद्विशेषस्यै
व विधेयत्वादित्यादिरूपेण स्यात् ततो नायं कर्मोत्पत्तिविधिः नन्वेवमपि अग्निहोत्रं जुहोतीत्ययमप्युत्पत्तिवि
धिर्न स्यात् रूपाश्रवणात् ततश्च दध्ना जुहोतीत्ययमेवोत्पत्तिविधिः स्यात् तथा चाग्निहोत्राधिकर
णविरोधः तत्र हि अग्निहोत्रं जुहोतीत्यस्योत्पत्तिविधित्वं दध्ना जुहोतीत्यस्य च गुणविधित्वमुक्तमिति चेत्सत्यं अ
ग्निहोत्रं जुहोतीत्यत्र यद्यपि रूपं नोपलभ्यते अग्निहोत्रपदाद्रूपस्य तत्प्रख्यन्यायेन नामधेयत्वात् तदेतदग्रे वक्ष्यामः
तथापि तस्योत्पत्तिविधित्वं स्वीक्रियते अन्यथानर्थक्यापत्तेः दध्ना जुहोतीत्यस्य च नानर्थक्यं गुणविधित्वात् अ
तः अग्निहोत्रं जुहोतीत्ययं कर्मोत्पत्तिविधिरिति युक्तं ज्योतिष्टोमेनेत्यस्य च नानर्थक्यं अधिकारविधित्वोपपत्तेः

भि

राम
७

अतःकिमर्थंसंभवत्युत्पत्तिवाक्येकर्मविधानेनइतिचेन्नतत्कार्थः किंचदध्नाजुहोतीत्यस्यकर्मोत्पत्तिविधित्वे
पयसाजुहोतीत्यनेनैवकर्मानुवादेननपयसोविधानेप्राप्तेउत्पत्तिशिष्टगुणावरुद्धत्वात् उत्पत्तिशिष्टगुणाव
रुद्धेहिनगुणान्तरंविधीयते आकांक्षायाउत्पत्तिशिष्टेनैवनिवृत्तत्वात् अतस्तेनापिविशिष्टकर्मान्तरंविधेयंतथा
चानेकादृष्टकल्पनागौरवं अग्निहोत्रंजुहोतीत्यस्यतुउत्पत्तिविधित्वेऽयंतद्वाक्यविहितस्यकर्मणोद्रव्याकांक्षायां
युगपदेवलैकिकयोतनायेन दध्नाजुहोतिपयसाजुहोतीत्यादिवाक्यैर्गुणाविधीयन्तेइतिनानेकादृष्टकल्पना
गौरवं अतोऽग्निहोत्रंजुहोतीत्ययमुत्पत्तिविधिः पयसाजुहोतीत्यादयस्तुगुणविधयइति सोमेनयजेतेत्य
त्रापिउत्पत्तिवाक्येकर्मोत्पत्तिविधानेस्वीक्रियमाणेनकिंचिद्दूषणंप्रत्युतैक्येएकस्यादृष्टस्यकल्पनात्तस्मात्सो
मेनयजेतेत्ययमेवोत्पत्तिविधिरिति अलमनयाप्रसक्तविधिनिरूपणागतप्रपंचचिंतयाप्रकृतमनुसरामः त
स्मिंश्चविधिः प्रयोजनवन्तमप्राप्तमर्थंविधत्तेइति सचविधिश्चतुर्विधःउत्पत्तिविधिर्विनियोगविधिरधिकारवि
धिःप्रयोगविधिश्चेति तत्रकर्मस्वरूपमात्रबोधकोविधिरुत्पत्तिविधिः यथाग्निहोत्रंजुहोतीति उत्पत्तिविधौचक
र्मणःकरणत्वेनैवान्वयः होमेनेष्टंभावयेत् नतुहोमंकुर्यादितिसाध्यत्वेन तथासतिसाध्यस्यसाध्यान्तरान्वयायोगेना
धिकारवाक्यावगतफलसंबंधोनस्यात् करणत्वेनत्वन्वयेहोमेनेष्टंभावयेत् किंतदिष्टमित्याकांक्षायांफलविशेष

संबंधश्च तेन चोत्पत्तिविधेरिष्टभावकपदाभावेन कर्मणा इष्टं भावयेदिति कथं वा कार्यार्थ इति वाच्यं विधिश्रुतेः स्वेष्ट
बोधकत्वात् तस्माद्धि पुरुषार्थे पुरुषं प्रवर्तयंती कर्मणः फलसंबंधमात्रं बोधयति तस्मादुक्तमुत्पत्तिविधौ कर्मणा वे
नान्वेतीति अत एवोद्भिदा यजेतेत्यादौ तृतीयांतोद्भिच्छब्द उपपद्यते उद्भिदा यागेनेष्टं भावयेदित्यन्वयोपपत्तेः ये
षामयोष्टसाधनत्वे लिङर्थेष्वेषामपि तृतीयांतानां कर्मनामधेयानामन्वयोनुपपन्न एव न हि संभवति यागा
इष्टसाधनं उद्भिदिति तृतीयोपात्तस्य कारकस्य लिंगसंख्यान्वयायोगस्य क्रियायैवान्वयात् न तु तथाग्निहो
त्रं जुहोतीत्यादिषु द्वितीयांतानां कर्मनामधेयानामन्वयोनुपपन्नः न हि संभवति होमेन भावयेदग्निहोत्रमि
ति संबंधश्रूयमाणा तावत् द्वितीया अर्थे ति ममाध्यतान्वादः होमस्य हि करणत्वेनान्वयात् असाधितस्य च
करणत्वानुपपत्तेः तस्मादत्रानन्वयोपपत्तिस्तेनास्मत्पन्नजुहोतीति वत् तृतीयार्थं लक्षयति अग्निहोत्रेण हो
मेनेष्टं भावयेदित्यत्र कर्मार्थं भारधिमिश्रैः अतश्च द्वितीयांतानां कर्मनामधेयानामन्वयोनुपपन्नः तस्मिन्नु
त्पत्तिविधौ कर्मकरणत्वेनान्वेतीति अंगसंबंधबोधको विधिर्विनियोगविधिः यथा दध्ना जुहोतीति स हि तृती
याप्रतिपन्नांगभावस्य दध्नः होमसंबंधं विधत्ते दध्ना होमं भावयेदिति एतस्य च विधेः सहकारिभूतानि षट् प्र
माणानि श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यारूपाणि एतत्सहकृतेन विधिनांगत्वं परोद्देशप्रवृत्तत्वं ति

यागानन्तर्यं पारार्थ्यं पर्यायेणाख्यते तत्र निरपेक्षो रवः श्रुतिः सा च त्रिविधा विधात्री अभिधात्री विनियोक्त्री चेति
तत्र विधात्री लिङाद्यात्मिका अभिधात्री व्रीह्यादिश्रुतिः यस्य च शब्दस्य श्रवणादेव संबन्धः प्रतीयते सा विनियोक्त्री
सा च त्रिविधा विभक्तिरूपा समानाभिधानरूपा एकपदरूपा चेति तत्र विभक्तिश्रुत्या अङ्गत्वं यथा व्रीहिभिर्यजेतेति तृती
याश्रुत्या व्रीहीणां यागाङ्गत्वं न चोत्पत्तिशिष्टपुरोडाशावरुद्धे यागे कथं व्रीहीणामङ्गत्वमिति वाच्यं पुरोडाशप्रकृ
तितयोपपत्तेः पशोरिव हृदयादिरूपहविःप्रकृतितया यागाङ्गत्वं न च मा तावत्पशोरेवाङ्गत्वं किं न स्यादिति वाच्यं
तस्य विशसनात् अवदीयमानत्वाच्च हृदयादीनां अवदीयमानं हि हविर्यथा पुरोडाशादि मध्यात्पूर्वार्द्धाच्चावद्यती
ति वाक्यात् हृदयादीनि चावदीयमानानि न पशुः हृदयस्याग्रेऽवद्यतीति वाक्यात् अतो हृदयादीन्येव हवींषि
पशुस्तु प्रकृतिद्रव्यं यथा तीव्रघोगे तु मांसानां पशोरेवाङ्गत्वं तस्य जीवत एव पर्यग्निकृतं पत्नीवन्तमुत्सृजन्तीत्युत्सर्गश्रव
णात् यत्र तु विशसनं तत्र पशुः प्रकृतिद्रव्यमिति सिद्धं एवं व्रीहयोऽपि प्रकृतिद्रव्यतया यागाङ्गत्वं तृतीयाश्रुत्येति ।
आरुण्यस्यापि क्रियाङ्गत्वं तृतीयाश्रुत्या न चामूर्तस्य तस्य कथं क्रियाङ्गत्वमिति वाच्यं एकहायनीरूपद्रव्यपरिच्छे
दद्वारा तदुपपत्तेः व्रीहीन्प्रोक्षतीत्यत्र प्रोक्षणस्य व्रीह्यङ्गत्वं द्वितीयाश्रुत्या तच्च प्रोक्षणं न व्रीहिस्वरूपार्थं स्वरूपेऽन
र्थक्यात् व्रीहिस्वरूपस्य प्रोक्षणं विनाप्युपपत्तिभावात् किं तु अपूर्वसाधनप्रयुक्तं यदि व्रीहिषु प्रोक्षणं क्रियते तदा

तैर्योगेकृतेसूर्वंभवतिनान्यथेति अतःप्रकरणासहकृतयाद्वितीयाश्रुत्यातंडुलनिर्वृत्तिप्रनाडायायदसर्वंसाधनंतदे
गात्वंव्रीहीणांस्वोच्यतइति एवंसर्वेष्वपिविनियोगेष्वपूर्वप्रयुक्तत्वंवेदितव्यम् एवंचसामर्थ्यात्प्रमाणान्तरस्यतत्स्वस्याभिधानी
मादत्तःस्त्रत्रापिद्वितीयाश्रुत्यामंत्रस्याभिधानंगत्वंयत्तुयाकवीयोयंविनियोगइतितत्रनतथासतिवाक्याल्लिङ्गस
बलीयस्त्वेनतयावक्याकादस्याभिधानांगत्वंभवतितावल्लिंगाद्रूपानामात्रांगत्वमेवस्यात् स्योनंतेसदनंकृणोमी॥
त्यस्यैवसदनांगत्वंश्रौतविनियोगःपदेनतयाचलिंगाद्रूपानामात्रांगत्वंसंभवतितावश्रुत्यापैन्द्र्यागार्हपत्यमुप
तिष्ठतइत्यत्रतृतीयाश्रुत्यायैन्द्र्यागार्हपत्योपस्थानांगत्ववत् अस्याभिधानांगविनियोगःक्रियतइति युक्तंमंत्र
स्याभिधानांगत्वंतस्माच्छ्रौतएवायंविनियोगः यदाहवनीयेजुहोतीति आहवनीयस्यहोमांगत्वंसप्तमीश्रुत्ये
तिएवमन्येपिविभक्तिश्रुत्याविनियोगोज्ञेयः पशुनायजेतेत्यत्रैकत्वपुंस्त्वयोःसमानाभिधानश्रुत्याकारकांग
त्वंयजेतेति आख्यातयाभिहितसंख्यायाभावनांगत्वंसमानाभिधानाश्रुतेरेकपदश्रुत्याचयागांगत्वमितिनयाम्
नीयातस्याकथंयागांगत्वमितिवाच्यम् कर्त्रपरिच्छेदद्वारातदुपपत्तेः कर्त्ताचात्रोपलभ्यःआख्यातेनहिभावनो
च्यतेसाचकर्तारंविनानुपपन्नातमाक्षिपति ननुकिमित्येवमर्थ्यतेअत्रोपलभ्यःकर्त्तेति आख्यातवाच्यएवकिंन
स्यात् आख्यातश्रवणेभावनायाःस्वकर्तुरपिप्रतिपत्तेः नचभावनयैवात्रोपसंभवेकिमितितद्वाचकत्वंकल्प

नीयमितिसांप्रतं तथासतिन्माख्यातवाच्यकर्त्रैवभावनादेरपिसंभवेतद्वाचकत्वमपिनस्यात् किंचभावना
यानकेवलंकर्त्रैवसंबंधःकारकांतराणामपिसंबंधात् अतःमानकदितिकर्त्तारमेवाविधेयेत् विशेषाभावात्
कर्त्रा तुभावनयैवसंबंधोनकारकांतरेण गुणानांचपरार्थत्वादसंबंधःसमत्वात्स्यादितिन्यायात् अतःसफ
दितिनामाद्वितीयेदितिसप्ययवास्यातवाच्योभावनादेरपिलभ्यैवकिन्नस्यात् किंचैवंतृतीयादिविभक्तीनाम
पिकरणत्वादिवाचकत्वंनस्यात् तेषामपिकर्त्तृवदादेरपिलाभसंभवात् किंचयदिकर्त्तानवाच्यःस्यात्कथमे
कत्वेतेनान्वीयात् नहिप्रत्ययार्थमप्रधानेनान्वेति अन्यथाऽऽहादिलोपप्रसंगात् किंचदेवदत्तःपचतीतिसामानाधि
करण्यंनस्यात् नहिकेवलंभावनावाचकस्याख्यातस्यदेवदत्तपदेनसामानाधिकरण्यमुपपद्यते एकार्थ
निष्ठत्वाभावात्कर्तृवाचकत्वेनप्रत्ययघटितपदं तत्कर्त्तरीतिव्याकरणस्मृतिविरोधस्तत्कर्त्तुरनभिधेयत्वेस्यादे
वकिंचकर्तुरनभिधेयत्वेदेवदत्तेनपचतीतिप्रयोगप्रसंगः तृतीयाह्यनभिहितयोःकर्तृकरणयोर्विहितास्मा
ख्यातेनचकर्त्तानामभिहितःइतिकर्तृवाचकत्वात्तृतीयास्यादेवकर्तुरभिधानेत्वभिहितत्वाद्देवदत्तेनप्राप्नोति
तस्याः अनभिहिताधिकारत्वात् देवदत्तःपचतीतिप्रथमातुप्राप्नोत्येवप्रथमायाअभिहितकारकविभक्ति
त्वात्प्रातिपदिकार्थमात्रवाचित्वाद्वानचतदाप्रातिपदिकेनैवार्थस्याकत्वात्प्रथमावैयर्थ्यंलिंगसंख्याप्र

तिपत्त्यर्थं तस्यावश्यकत्वात् केवलप्रातिपदिकस्य प्रयोगासाधुत्वाच्च ततश्च यदि कर्त्ता न वाच्यः स्यात्तर्हि देवदत्तेन
पचतीति प्रयोगः स्यात् तस्मादाख्यातवाच्यः कर्त्तेति सिद्धमिति पूर्वपक्षसंक्षेपः अत्राहुः सपवदिप्राह्वस्यार्थो यः
प्रकारान्तरेण न लभ्यते अनन्यलभ्यः शाब्दार्थ इति न्यायात् अत एव न गंगापदस्य तीरमर्थः लक्षणयैव प्र
तिपत्तिसंभवात् अत एव न वाक्यार्थे शक्तिः एवं चाख्यातवाच्यभावनाकर्त्तारं विनानुपपन्नातमाक्षिप
तीति आक्षेपादेव कर्त्तुः प्रतिपत्तिसंभवे किमिति तद्वाचकत्वमाख्यातस्य कल्पनीयं न च विनिगमनाविर
हः कृतिमाक्षिकर्त्तापवं च कृतेरेव भावनायाः पर्यायाः आकृत्यधिकरणन्यायेनाख्यातवाच्यत्वसंभवे
न तद्वतः कर्त्तुर्वाच्यत्वकल्पनीयं गौरवप्रसंगात् न च भावनाकारकान्तरेणापि संबद्धान्तुक्तिं विना न फटि
ति कर्त्तारमाक्षिपतीति वाच्यं साहि यथा नियमेन कर्त्रा संबद्धा न तथा करणादिकारकान्तरेण तिष्ठतीत्यादि
श्रुतत्या तदनाक्षेपात् अतः सा प्रथमं कर्त्तारमेवाक्षिपति न कारकान्तरेण अत एवाख्याताभिहितासंख्या न
कारकान्तरेण संबध्यते तस्य प्रथममनुपस्थितेः अत एव तृतीयादिविभक्तीनां करणादिवाचित्वे भावना
याक्षेः सह नियतसंबन्धाभावेन तयोतेषां नियमेनानाक्षेपात् आख्यातश्रवणाभावेऽपि तृतीयादिविभक्ति
श्रवणादिप्रतीतेर्जायमानत्वाच्च न च पाट्टीमित्याकथमपाद्देनकर्त्रन्वेनीति वाच्यं कर्त्तुलेक्षणाङ्गीकारात्

रामः
२०

यथा चलति नेत्रीं रश्म्यादेनं चोदयति नावेतीति एवं लतितः कर्तापि कर्तेवान्वेषति अत एव च देवदत्तः पचतीति सामा
नाधिकरण्यमुपपद्यते कर्तृलक्षणात् तत्र च मुख्यमेव भवति किमिति लाक्षणिकत्वं स्वीकार्यमिति वाच्यं अनन्य
लभ्यशाब्दार्थत्वस्य स्थापितत्वात् अन्यथा सिंहो देवदत्त इत्यपि सामानाधिकरण्यं मुख्यं स्यात् किंच आख्यातवा
च्यः कर्तेति वादिनो मतेपि देवदत्तः पचतीति सामानाधिकरण्यं न मुख्यं तन्मते आख्यातेन तृतीयावत् निष्कृष्ट
शक्तिमात्रस्य कर्तृकारकाभिधानात् शक्तिमद्द्रव्यस्याकृत्यधिकरणन्यायेनानभिधानात् देवदत्तपदेन च
द्रव्यमात्राभिधानात् अतस्त्वभिन्नार्थनिष्ठत्वात्तन्मतेपि न मुख्यं सामानाधिकरण्यं किंतु लाक्षणिकमेवेति न क
श्चिद्विशेषः न च लः कर्तरीति व्याकरणस्मृतिबलादाख्यातवाच्यः कर्तेति वाच्यं न हि वाच्यवाचकभावो व्या
करणस्मृत्यधीनस्तस्य न्यायसहितान्वयव्यतिरेकगम्यत्वात् भवतु स्मृतिगम्यस्तथापि नेयं स्मृतिः कर्तुराख्या
तवाच्यत्वे प्रमाणं किंतु कर्तुरेकत्वे एकवचनात्मको लकारः द्वित्वे द्विवचनात्मकः बहुत्वे बहुवचनात्मक इत्यस्मिन्न
र्थे प्रमाणं द्व्येकयोर्द्विवचनैकवचने बहुषु बहुवचनमित्यनेनास्याः स्मृतेरेकवाक्यत्वात् यत्तु कर्तुरनभिधाने
देवदत्तेन पचतीति तृतीयाप्रसंग इति तन्न तृतीया हि कर्तृप्रतिपत्त्यर्थं तत्कृतसंख्याप्रतिपत्त्यर्थं वा तत्र कर्ता तु भा
वनाक्षेपादेव लभ्यत इति न तत्र तृतीयापेक्षा न संख्या तु आख्यातेनैव प्रतीयत इति न तत्राप्यपेक्षा यथाहुः संख्यायां

कारके वार्थे किं भक्तादिः प्रवर्त्तते अयं चात्र तस्मिंश्च भावनातिद्धिभक्तित इति यत्र नाम्ना तेन तत्कृतां संबन्ध्यते तत्र भ
वत्येव तन्नीयाम्यथा देवदत्तेनौदनः पच्यत इति तस्मात्तत्कर्तृत्वमनभियाने किंचिद्दूषणमित्यलमिति विस्तरेण प्रकृ
तमनुसरामः तस्मिंश्च त्रिविधश्रुतिविनियोगाः सेयं श्रुतिर्लिंगादिभ्यः प्रबले प्रमाणं लिंगादिषु हि न प्रत्यक्षो
विनियोजकः शब्दोऽस्ति किंतु कल्प्यः यावच्च तैर्विनियोजकः शब्दः कल्प्यते तावत्प्रत्यक्षया श्रुत्या विनियोगस्य कृ
तत्वात् तेषां कल्पकत्वमेव विहन्यत इति श्रुतेः प्राबल्यं श्रुतयैन्द्र्या गार्हपत्यमुपतिष्ठत इत्यत्र यावल्लिंगादै
न्द्रीइन्द्रोपस्थानार्थत्वं कल्प्यते तावत्प्रत्यक्षया श्रुत्या सामर्थ्यं पत्न्योपस्थितार्थत्वं क्रियत इति ऐन्द्री गार्हपत्योपस्था
नांगं सामर्थ्यं लिंगं यथाहुः सामर्थ्यं सर्वभावानां लिंगमित्यभिधीयत इति तेनांगत्वं यथा बर्हिर्देवसदनं दामी
त्यस्य लवनांगत्वं स हि लवनप्रकाशयितुं समर्थः तच्च लिंगं द्विविधं सामान्यसंबन्धबोधकप्रमाणान्तरापेक्षं
तदनपेक्षं च तत्र यदन्तरेण यन्न संभवत्येव तस्य तदंगत्वे तदनपेक्षं केवललिंगादेव यथार्थज्ञानस्य कर्मानुष्ठा
नांगत्वमर्थज्ञानमन्तरेणानुष्ठानं न संभवति यदन्तरेणापि यत्संभवति तस्य तदर्थत्वे तदपेक्षं यथोक्तस्य मन्त्रस्य
लवनांगत्वे लवनं हि मन्त्रं विनाप्युपायान्तरेणापि कर्त्तुं शक्यते न च मन्त्रेण लवनस्वरूपार्थं संभवति किंतु अपूर्वसा
धनीभूतलवनप्रकाशनार्थः तच्च न सामर्थ्यमात्रादवगम्यते लवनप्रकाशनमात्रे सामर्थ्यात् अतो वचनप्र

करणादिसामान्यसंबंधबोधकोऽसौ कार्यं दर्शपूर्णमासप्रकरणे बर्हिर्मंत्रस्य पाठादेवमवगम्यते अनेन मंत्रेण द
र्शपूर्णमासापूर्वसंबंधि किंचित्प्रकाश्यत इति अन्यथा प्रकरणपाठवैयर्थ्यप्रसंगात् किं तदपूर्वसंबंधि प्र
काश्यमित्यपेक्षायां सामर्थ्याद्बर्हिर्लवनमित्येवावगम्यते तद्धि बर्हिःसंस्कारद्वारापूर्वसंबंधीति मंत्रस्य सामर्थ्या
त् दर्शत्वेऽसति नानर्थक्यं प्रसज्येत तस्माद्बर्हिर्देवसदनं दामीत्यस्य प्रकरणात् दर्शपूर्णमाससंबंधितयाव
गतस्य सामर्थ्याल्लवनांगत्वमिति सिद्धं एवं तावन्मंत्राणां मंत्राणां तु यागानुमंत्रणसमाख्यया यागसामान्यसं
बंधे ज्ञाते सामर्थ्यात्पूषयागसंबंधोऽवगम्यते न तु तेषां यावत्समाख्यया पूषयागेन सामान्यसंबंधोऽवगम्यते
ना तावत्प्रकरणात् दर्शपूर्णमासाभ्यामेव सामान्यसंबंधोऽवगतः समाख्यातस्य दुर्बलीयस्त्वात् अत एव पौ
रोडाशिकमिति समाख्याते ब्राह्मणे आम्नातानामपि विध्ययाजानां प्रकरणात् सान्नाय्ययागांगत्वमपीष्ट
म्। किंच यागानुमंत्रणसमाख्यायापि न पूषयागेन सामान्यसंबंधोऽवगम्यते किं तु यागमात्रेण प्रकरणेन तु
दर्शपूर्णमासाभ्यामेव विशेषसंबंधोऽवगम्यते अतः प्रकरणान्न भिद्यते न संबंधस्यैवावगतत्वात् तदर्थ
त्वमेव तेषां युक्तं पूषेति पदात् पूष्णः प्रकाशनमिति तन्न यागस्य कथंचिदप्यनभिधायित्वात् मैवं पूषानुमंत्रणमंत्रे
ष्विष्यमाणे यदेवमवगम्यते पूषाभिधानसमर्थत्वादयं मंत्रस्तत्प्रकाशनार्थ इति लवनमंत्रे च लवनस

उ
१२

काशनार्थः न तत्र प्रकरणाद्यपेक्षायेन तेषामुपजीव्यत्वेन प्राबल्यं स्यात् प्रकरणात् दर्शपूर्णमासार्थत्वेन त
स्यावाक्यलिंगाभ्यां तत्कल्पनेन विनियोजकत्वात् लिंगस्योपजीव्यत्वेन प्राबल्यं अतो लिंगात् सूक्तप्रकाशनार्थत्वेना
तेन तन्मात्रप्रकाशनमनर्थकमिति असर्वसाधनसूक्तप्रकाशनार्थत्वं वक्तव्यं किं तत्सर्वमित्यपेक्षायां या
गात् मंत्राणां समाख्यानुगृहीतलिंगात् सूक्तयागासर्वसंबंधिदेवताप्रकाशनार्थोयमित्यवगम्यते अतो यद्य
पि समाख्यातः प्रकरणं बलीयस्तथापि तस्य लिंगेन बाधितत्वात् समाख्यायाः दुर्बलोपि प्रबललिंगाश्रित या
त्वेन प्राबल्यात् तथैव सामान्यसंबंधे प्रमाणं संभवति च दुर्बलस्यापि प्रबलाश्रितस्य प्राबल्यं अतएव श्रुत्यपे
क्षया दुर्बलाया अपि स्मृतेराचमनरूपप्रबलपदार्थाश्रितत्वेन प्राबल्यात् पदार्थधर्मस्य गुणभूतस्य श्रौतक्रम
त्यागेनेष्टकरणानंतरं स्मृतेराचमनमेव कार्यमित्युक्तं यथाहुः अंगं तद्बलवत्तोपि पैरर्ज्ञानयदा ज्ञना:
दुर्बलैरपि बाध्यंते गुरुभिः पार्थिवाश्रितैरिति यत्तु सूक्तेति पाठः कथंचिदग्न्याद्यभिधायीति तन्न तस्यादं तत्को
हि सर्त्यादिवाक्यशेषेण वैदिकप्रसिद्ध्याचार्थविशेषे रूढत्वात् रूढेश्चावयवार्थलोचनसापेक्षायोगाद्ब
लीयस्त्वात् अतएव वर्षास्वरथकारोऽग्नीनादधीतेत्यत्र रथकारशब्देन सौधन्वनापरपर्यायो वर्णविशेष
उच्यते रूढेः प्राबल्यान्नतु रथं करोतीति व्युत्पत्त्या द्विजातयो योगस्य दौर्बल्यादित्युक्तं षष्ठे तस्मादुक्तं समा

राम.
१२

व्ययासामान्यसंबंधेवगतेसामर्थ्यात्मुख्ययागसंबंधः पूषानुमंत्रणमंत्राणामिति यथाहुः पूषानुमंत्रणानी
तिसमाख्याकृतयोजिका तस्माच्छ्रुत्यनुरोधेनप्राप्तिमान्दैवतेकृताविति तत्सिद्धं प्रमाणांतरसिद्धसामान्यसंबं
धस्यापवादार्थस्यविनियोजकंलिंगमिति तत्र मंत्रविनियोजकंलिंगंमुख्यएवार्थेविनियोजकंनगौणेमुख्या
र्थस्यप्रथमप्रत्युपस्थितत्वेनतत्रैवविनियोगाद्बुद्धौपर्यवसन्नायांपुनर्गौणेर्थेविनियोगाकल्पनायांगौरवप्र
संगात् अतएवबर्हिर्देवसदनंदामीतिमंत्रः सामर्थ्यात्कुशलवनांगंतेषांमुख्यत्वात् नतूलपराजिलवनां
गमित्युक्तं तदिदंलिंगंवाक्यादिभ्योबलवत् तेषांहि नस्वातंत्र्येणविनियोजकत्वं किंतुश्रुतिंकल्पयित्वानचासम
र्थस्यश्रुतिंकल्पयित्वाविनियोगाकल्पनासंभवतीति सामर्थ्यस्यापि कल्प्यत्वेनोपजीव्यत्वात् अतस्तैर्या
वत्सामर्थ्यंकल्पयित्वाश्रुतिःकल्प्यतेतावदेवक्लृप्तेन सामर्थ्येनश्रुतिंकल्पयित्वाविनियोगःक्रियतइतित
स्यप्राबल्यं अतएवस्योनंतेसदनंकृणोमिघृतस्यधारयासुशेवंकल्पयामीत्यस्यसदनांगत्वंलिंगात् नतुवाक्या
त् स्योनांगत्वंतस्यदौर्बल्यादिति समभिव्याहारोवाक्यं समभिव्याहारोनामसाध्यत्वादिवाचकद्वितीया
द्यभावेवस्तुतःशेषशेषिणोःसहोच्चारणं यथायस्यपर्णमयीजुहूर्भवतिनसपापंश्लोकंशृणोतीति ।
अत्रहिनद्वितीयादिविभक्तिःश्रूयतेकेवलंपर्णताजुह्वोःसमभिव्याहारमात्रंतस्मादेवपर्णतायाजुह्वंग

तेनचानर्थक्यं जुहूप्राप्तेनापूर्वलक्षणत्वात् नद्ययेवाकार्थ्यः पर्णतयाश्रवणात् हविरामणाधारायदृष्टविशमायमनेत
दृष्टावयेदिति एवं च पर्णतया यदि जुहूः क्रियते तदैव तत्साध्यमपूर्वं भवति नान्यथेति गम्यतऽ तेन पर्णतायाः
वैयर्थ्यं श्रवणात् हविरधारणाद्वारेति चावश्यं वक्तव्यं अन्यथा श्रुवादिष्वपि पर्णतायाः तेः सा चेयं पर्णता नारभ्या
धीतान सर्वक्रतुषु गच्छति विकृतिषु चोदकेनापि प्राप्तिसंभवे द्विरुक्तत्वापत्तेः किं तु प्रकृतिष्वेव तदुक्तं प्रकृ
तौ वा द्विरुक्तत्वादिति अत्र विकृतिर्यत्तेगानिर्दिष्टानि तासु प्रकृतिरिति न प्रकृतिषु प्राप्तेन विवक्षितं गृहमेधीयेष
पर्णतायाः प्राप्तिप्रसंगात् न हि गृहमेधीयतः काचन विकृतिरंगानिर्दिष्टानि मानाभावात् किं तु चोदका
घत्रांगप्राप्तिस्तत्कर्मप्रकृतिषु प्राप्तेन विवक्षितं यथा दर्शपूर्णमासौ तत्र हि न चोदकादंगप्राप्तिः प्रकरणपठि
तैरेवांगैर्नैराकांक्षत्वात् गृहमेधीयादिष्वपि न चोदकादंगप्राप्तिः कृष्णोपकारैरेव आज्यभागादिभिर्नैराकांक्ष्या
त् अतो यत्र चोदकाप्राप्तिस्तत्रानारभ्याधीतानां संनिवेशः सामदग्न्यपत्वनारभ्याधीतमपि प्रकृतौ गच्छति प्रकृतेः
पौर्णमास्यावरोधात् किं तु विकृतिं गच्छति तत्रापि न सर्वासु गच्छति चोदकप्राप्तेषोचदशत्वाय प्रसंगात् किं तु
प्रत्यक्षश्रुतसामिधेनीपास्तुमित्रविंदादिषु गच्छति यथाहुः एवं च प्रकृतावेतत्पाचदशत्वप्रतिष्ठिते विकृतौ चन
यत्राप्तिसामदश्यपश्रुतःश्रुतिरिति नववाक्यवैयर्थ्यं अनारभ्याधीतस्यैव सामिधेन्यस्य मित्रविंदादिप्रकरण

राम
२२

स्येनवाक्येनोपसंहारात् उपसंहारो नाम सामान्यप्राप्तस्य विशेषे नियमनं यथाहुः सामान्यविधिरस्पष्टः संह्रि
यते विशेषतन्मते तत्स्थानाभ्यां विधिः सामान्यविधिः मित्रविंदादिप्रकरणस्थस्तु विशेषविधिरित्यास्तां तावत्प्र
कृतमनुसरामः तत्सिद्धं वाक्यादंगत्वे तदिदं वाक्यं प्रकरणाद्बलीयः प्रकरणं हि नमात्राद्धि नियोजकं तद्धि प्राक्
तादृशेन वाक्याद्याकांक्ष्य प्रमाणांगितं सामान्यदेवाक्यं तद्बलाद्भवत्येतादृशी मतिः नूनमिदं वाक्यं केनचिद्वाक्येनैक
वाक्यभूतमिति तत्प्रकल्पिताकांक्षारूपं प्रकरणं वाक्यस्य वाक्यान्तरैकवाक्यत्वे प्रमाणं एवं च यावत्प्रकरणं वाक्यं क
ल्पयित्वा विनियोजकं भवति तावद्वाक्यं लिंगश्रुती कल्पयित्वा विनियोजकं भवतीति प्रकरणाद्वाक्यं बलीयः
अत एवैन्द्राग्नी ध्रुवं हविरित्युचे तामवीवृधेन्ता महोऽयायुष्कामेत्येन्द्राग्नीयपदस्य लिंगाद्दर्शांगत्वे सिद्धे ध्रुवं हविरित्या
दोपितदेकवाक्यत्वाद्दर्शांगत्वेन तत्प्रकरणाद्दर्शपूर्णमासांगत्वं प्रकरणाद्वाक्यस्य बलीयस्त्वादिति अथाकां
क्षाप्रकरणं यथा प्रयाजादिसमभिव्याहृते जेतत्र हि कं ह विशेषस्यानिर्देशात्समभिधानेन भावयेत्किमिति अस्तु उप
कार्याकांक्षा दर्शपूर्णमासवाक्येऽपि दर्शपूर्णमासाभ्यां स्वर्गं भावयेत्कथमित्यस्त्युपकारकाकांक्षा अत उभया
कांक्षया प्रयाजानां दर्शपूर्णमासांगत्वं सिद्धमिति ननु यदि प्रयाजादिवाक्येषु विशेषो न श्रूयते तर्हि विश्वजिन्न्या
येन स्वर्गः फलं कल्प्यतां विश्वजिदधिकरणे हि विश्वजिता यजेतेत्यत्र फलस्याश्रवणात्फलमंतरेण च विधिश्रु

तेरवपपत्तेरवं प्रयफलेकल्पयितव्ये सर्वाभिलषितत्वेन स्वर्गः फलमित्युक्तं तदुक्तं स स्वर्गः स्यात्सर्वान्प्रत्यविशिष्टत्वा
दिति रात्रिसत्रन्यायेनार्थवादिकं फलं कल्प्यतां रात्रिसत्राधिकरणे हि प्रतितिष्ठन्ति ह वै य एता रात्रीरुपयन्तीत्य
त्र विधावदृष्टफलाश्रवणात्फलमन्तरेण च विधिश्रुतेरनुपपत्तेरवं प्रयफले कल्पयितव्ये आर्थवादिकं प्रतिष्ठाख्यं
फलमित्युक्तं विश्वजिदधिकरणन्यायेनानुपस्थितस्वर्गकल्पने तस्य प्रकृतसंबंधकल्पने गौरवादर्थवादोप
स्थितस्यैव प्रकृतफलत्वकल्पने लाघवात् तदुक्तं फलमात्रेयो निर्देशादश्रुतौ ह्यनुमानं स्यादिति तस्माद्विश्वजि
न्न्यायेन रात्रिसत्रन्यायेन वा स्वतंत्रफलार्थत्वं संभवति किमिति दर्शपूर्णमासांगत्वं स्वीक्रियत इति चेन्नैवं स्व
तंत्रफलार्थत्वे ह्यन्यतराकांक्षया संबंधः स्यात् न च तत्र फलस्य साधनाकांक्षास्ति श्रूयमाने हि फले साधनमा
कांक्षति न चात्र तच्छ्रूयते एवं च फलस्याकांक्षाभावात्केवलं किं भावयेदिति प्रयाजानां भाव्याकांक्षैव स्व
तंत्रफलार्थत्वं स्यात् दर्शपूर्णमासार्थत्वे तूभयाकांक्षा प्रमाणं प्रयाजानां भाव्याकांक्षायास्तत्र च कथंभावा
कांक्षायाः सत्त्वात् अन्यतराकांक्षातश्चोभयाकांक्षा बलीयसीति वक्ष्यते ततश्च दर्शपूर्णमासार्थत्वमेव युक्तं
न स्वतंत्रफलार्थत्वमिति तदुक्तं द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्यादिति अन्ये त्वङ्गेष्वफल
श्रुतिर्यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीत्येवमाद्यासंस्कारफलश्रुतिर्यदांक्ते च देरेव श्रातव्य

स्यहेतुः इत्येवमाद्याः कर्मणां फलव्यक्तिर्धर्मेवायतनं यत्तस्य क्रियते यत्स्या याजा अनूयाजाऊर्ध्वं तत् इत्येवमाद्यं कर्म यद्देवा
राद्युपकारकं कर्म यद्यं द्रव्यसंस्कारकर्मणां पृथक् संकीर्तनादि त्यागस्तानना वदिदं प्रकरणं क्रियाया एव विनियोजकं
न द्रव्यगुणयोः तयोस्तु क्रियायोगाद्धि नियोजकं ॥ तत इति चेद् यथा यजेत स्वर्गकाम इत्यत्राख्यातेनाप्रोनार्थी भावनाभिधी
यते भावयेदिति सा चांशत्रयमपेक्षते किं भावयेत् केन भावयेत् कथं भावयेदिति करणांवादांशं समानपदोपात्तो
यागो भावार्थाधिकरणन्यायेनावेति यागेन स्वर्गं भावयेदिति ततः कथमिति कथंभावाकांक्षा जायते तस्यां चा
कांक्षायां यत्सन्निधौ पठितं श्रूयमाणफलकं च क्रियाजातं तद्देवोपकार्याकांक्षया इतिकर्तव्यतात्वेनान्वयमनुभ
वितुं योग्यं क्रियाया एव लोके कथंभावाकांक्षायामन्वयदर्शनात् नहि कुठारेण भिंद्यादित्यत्र कथमिति आकां
क्षायां हस्तः इति केवलं उच्चार्यमाणेपि हस्तोन्वयं प्राप्नोति किं तर्हि हस्तेनोद्यम्य नियात्येत्युच्चार्यमाणे उद्यमननिय
तनेयवा हस्तोपि तद्द्वारेणैवान्वयं प्राप्नोतीति सार्वजनीनमेतत् किं च कथंभावाकांक्षा नाम करणगतप्रकाराकांक्षा
थमुक्तः प्रकारवाचित्वात् सामान्यस्य भेदको विशेषः प्रकारः सामान्यं च क्रियारूपमेवाख्यातेनोच्यते यजेत स्वर्ग
काम इत्यस्य हि अयमर्थः यागेन तथा कर्तव्यं यथा यागात् स्वर्गो भवतीति क्रियासामान्यस्य च विशेषः क्रियैव
भवति न हि ब्राह्मणविशेषः परिव्राजकादिरब्राह्मणो भवति एवं च करणगतक्रियाविशेषाकांक्षाः परनामधेय

ऊँ
१५

कथंभावाकांक्षायांक्रियैवान्वेतीतीत्युक्तं सच करणात: क्रियाविशेषो न्यायानादिसाम्यात् तर्यणान क्रियारूपस्यैवेति
युक्तं तस्य प्रकरणेन ग्रहणान तस्य चकारणात तत्वे तदुपकारकत्वमेव तेन विनायागेनापूर्वाजनात् न ह्युपमन नियतन
व्यतिरेकेणाङ्गारेणाद्वैधीभावाजन्यते तत्सिद्धं कथंभावाकांक्षायां क्रियैवान्वेतीतीत्युक्तं अतएव द्रव्यदेवतयोर्या
गसंपादनद्वारान्वयः संप्रदायैरुक्तः विज्ञातो च कथंभावाकांक्षायामुपकारसंपादनमतिदिश्यत इत्युक्तं यदि
च कथंभावाकांक्षायां सिद्धं वस्त्वन्वययोग्यं स्यात् तदा संपादनपर्यंतं धावनं ग्रंथकारणामनर्थकं स्यात् अतश्च
क्रियायाय एव इतिकर्तव्यता कथंभावाकांक्षाय दीतस्येतिकर्तव्यतात्वात् इति प्रारूपस्य च प्रकारवाचित्वात् कर्तव्य
स्येतिप्रकार इतिकर्तव्यताप्रकारस्य सामान्यस्य भेदको विशेष इत्युक्तं कर्तव्यस्य च विशेषः कर्तव्य एव भवतीति न
सिद्धस्य वस्तुन इतिकर्तव्यतात्वं किं तु क्रियाया एव सिद्धस्य तु द्रव्यादेः केवलमंगत्वं तदपि श्रुत्यादिना न तु प्रकरणात्
यथाहुः नावांतरक्रियायोगादृते वाक्योपकल्पितात् गुणद्रव्यैः कथंभावैर्गृह्णंति प्राकृताः क्रिया इति अतएव बर्हिर्दे
वसदनंदामीत्यादिमंत्राणां लिंगादंगत्वं न तु प्रकरणादित्युक्तं अर्थवादाधिकरणे पूर्वपक्षसमाप्तौ राणकेन क
चिद्द्रव्यस्येतिकर्तव्यतात्वाभिधानमंगत्वाभिप्रायं द्रष्टव्यं बहुत्वेन स्वरसादुक्तमुक्तेष्वितीति सिद्धं प्रकरणं क्रियाया
एव विनियोजकमिति तच्च प्रकरणं द्विविधं महाप्रकरणमवांतरप्रकरणं चेति तत्र फलभावनायाः प्रकरणं

महाप्रकरणं तच्च प्रयाजादीनां ग्राहकं तच्च प्रकृतावेव यत्र समग्राङ्गोपदेशः सा प्रकृतिः यथा दर्शपूर्णमासादिः तत्र
चोभयाकाङ्क्षात्मकं प्रकरणं संभवति आकाङ्क्षानुपरमात् विकृतौ तु न प्रकरणं संभवति यत्र न समग्राङ्गोपदेशः सा
विकृतिः यथा सौर्यादिः तत्र च यान्यपूर्वाण्यङ्गानि पठ्यन्ते उपहोमादीनि तेषां न प्रकरणं विनियोजकं तत्र यद्यपि तेषां
किं भावयेदित्यस्त्याकाङ्क्षा तथापि प्रधानस्य न कथंभावाकाङ्क्षास्ति प्राकृतैरेवाङ्गैर्निराकाङ्क्षत्वात् न च प्राकृतानाम
ङ्गानामत्रापठितत्वेनाप्रत्यक्षत्वाद्वैकृतानां तु पठितत्वेन प्रत्यक्षत्वात्तैरेवाकाङ्क्षोपशमः इति वाच्यं तेषां तु पठितत्वेऽप्य
कृत्स्नोपकारत्वेन झटित्याकाङ्क्षोपशमनेऽसामर्थ्यात् प्राकृतानां तु कृत्स्नोपकारत्वेन तच्छमने सामर्थ्यात् न चात्र तेषा
मुपस्थापकाभावः उपमितिलक्षणप्रमाणेन तेषामुपस्थितत्वात् सौर्यवाक्ये हि दृष्टे ऽग्नेयवद्द्रव्यत्वेनैकदेवत्य
त्वेन च सादृश्येन आग्नेयवाक्यमुपमीयते गवयदर्शनाद्गोरुपमानवत् यस्मिंश्चोपमिते तेन तद्दर्शी ज्ञायते सा च
ऽर्थभावना तत्र सौर्यवाक्ये भावनाया भाव्यकरणयोः सत्त्वादितिकर्तव्यताकाङ्क्षायामुपकारदृष्ट्या भावनाग्नेयेति
कर्तव्यतातिदिश्यते सौर्ययागेन ब्रह्मवर्चसं भावयेदाग्नेयवदिति तथा च तयैवाकाङ्क्षोपशमात्र विकृतेः प्रकरण
मस्ति अन्यतराकाङ्क्षात्मकं पुरस्थानादेव चापूर्वाङ्गग्रहणं न च प्राकृताङ्गग्रहणमेव विकृतौ प्रकरणं किं न स्यादिति वा
च्यं तेषामपि प्रकृत्युपकारतया ऽऽकाङ्क्षोपशमात् न तु प्राकृतानामङ्गानामाकाङ्क्षाभावेन तेषां विकृतिसंबन्धः

उ
९६

केवलं स्यान्नास्यात् अङ्गानां त्वाकांक्षासमभिव्याहृतेरप्याकांक्षावत्त्वात्तेषां तत्संबंधः प्रकरणात्स्यात्प्रकरणं च स्यान्नाङ्गादिति वि
नियोजकमित्यङ्गानामेव प्रथमं संबंधः स्यान्न प्राकृतानामिति उच्यते सत्यं प्रकरणं फलवति विनियोजकं तत्रापि प्रधा
नाबलाबलात्प्रथमेव बलाबलस्य न्याय्यत्वात् उक्तविधयोपस्थितत्वात्प्राकृतानामेव संबंधो युक्तः उक्तोपकारत्वात्
नवैकृतानां कल्प्योपकारत्वात् विकृतेश्चोपकारकपदार्थाकांक्षा न पदार्थमात्राणामिति युक्तः प्रथमं प्राकृतानां सं
बंधः ततश्च न विकृतौ प्रकरणं विनियोजकं यत्तु विकृतौ प्राकृतानामङ्गानामनुवादेन विधीयते यथौदुम्बरो यूपो भवती
ति यूपानुवादेनौदुम्बरत्वं तत्प्रकरणाद्बाध्यते ननु न तत्प्रकरणाद्बाध्यते प्रक्रियात्वात् क्रियायामेव प्रकरणग्राह्य
त्वादिति चेत्सत्यं तथापि तावद्विधीयमानस्यौदुम्बरत्वस्यास्त्येवाकांक्षा किं भावयेदिति न च यूपानुवादेन तस्य वि
धीयमानत्वात् यूपस्य चादृष्टरूपत्वात्तेनैवौदुम्बरत्वस्य नैराकांक्ष्यं स्यादाहवनीयेनेवायानस्येति वाच्यं यूपस्य केवला
दृष्टरूपत्वाभावात् तस्य हि तद्रूपत्वे खादिरत्वादिकं केवलादृष्टार्थं स्यात् न च तत्संभवति तथा सति खादिराभावे प्र
तिनिधित्वेन कदरोपादानं न स्यात् अदृष्टार्थस्य प्रतिनिध्यभावात् न हि खादिरजन्यमदृष्टं कदरेण क्रियते अत्र
प्रमाणमस्ति अनपवादादृष्टार्थानां प्रतिनिधिः तदुक्तं न देवताग्निशब्दक्रियमन्यार्थत्वादिति प्रतिनिधित्वेन चो
पादानं कदरादेः उक्तं ग्रन्थेषु तस्मान्न यूपस्य केवलादृष्टरूपत्वं अपि तु दृष्टादृष्टसंस्कारगुणो यूपप्रतिसंप्रदायिकाः

16

एवं च औडुंबरस्य न यूपमात्रेण नैराकांक्ष्यं तद्दृष्टसंस्कारस्य प्रकारांतरेणापि संभवात् अतस्तस्यौडुंबरत्वस्याकांक्षा विकृ-
तेरप्यस्ति कथंभावाकांक्षा सा च तदा स्याद्यद्युपकारास्तत्स्पृष्टभावेन च पदार्था अन्वीयंते ननूपकारमात्रान्व-
येन स्याम्यति अतस्त्वयष्टेंद्रियभावनायाः करणाकांक्षा दर्भाः करणत्वेनान्वये जाते सिद्धस्य करणत्वानुपपत्याहो-
मस्याश्रयत्वेनान्वये यावदनुवर्त्तते न तु दध्यन्वयमात्रेण निवर्त्तते आश्रयत्वेन च गृह्यमाणो होमः करणाकांक्षयै-
व गृह्यते इत्युच्यते न त्वाश्रयाकांक्षा नाम चतुर्थी अस्ति एवं च विकृतेः कथंभावाकांक्षा नोपकारान्वयमात्रेण नि-
वर्त्तते उपकारस्पृष्टभावेन यावत्पदार्थान्वयमनुवर्त्तते अतश्चोपकारस्पृष्टभावेन गृह्यमाणाः पदार्थाः कथंभावा-
कांक्षयैव गृह्यंते तत्र प्राकृताः पदार्थाः कथंभावाकांक्षया गृह्यमाणा अपि न प्रकरणग्राह्याः प्रकृत्युपकारतया ते-
षामाकांक्षाभावात् औडुंबरत्वादयस्त्वन्यत्वुपकारकतयाकांक्षाः पशुनियोजनयूपस्पृष्टभावेन यावत्खादि-
रत्वमायाति तावद्विधीयंत इत्युक्तं तेषां प्रकरणात्तद्ग्रहणमुभयाकांक्षत्वात् यदि हि यूपस्पृष्टभावेन खादिरत्वे
विहितं स्यात् ततो विकृतेराकांक्षाभावादौडुंबरत्वेन प्रकरणग्राह्यं स्यात् न चैतदस्ति चोदकस्य खादिरत्वाविषय-
त्वात् ननु यदि यावत्खादिरत्वमायाति तावदौडुंबरत्वं विधीयते तदा तेन खादिरत्वे बाधोऽप्राप्तः स्यात् तार्तीयबा-
धवत् तथा हि बाधो हि द्विविधः अप्राप्तबाधः प्राप्तबाधश्चेति तत्र तार्तीयो बाधोऽप्राप्तबाधः तत्र हि यावद्दुर्बलेन प्रमाणेन विनियो-
गः

प्राप्तबाधः

ऊं
२

कर्त्तुमारभ्यते तावदेव बलवत्प्रमाणेन विनियोगः क्रियत इति तद्बाधितेनेतरबाधोऽप्राप्तबाधः दुर्बलप्रमाणस्याप्रवृत्त
त्वात् प्राकृतस्य त्वङ्गस्य विकृतौ चोदकप्राप्तस्य प्रत्याम्नानादर्थलोपात्प्रतिषेधाद्वा यो बाधः स प्राप्तबाधः यथा प्राकृता
नां कृष्णलानां प्रतिकृष्णलं प्रत्याम्नानात् यथा यावद्धातस्य कृष्णलेषु वैतुष्यरूपप्रयोजनलोपात् यथा वा पित्र्येष्टौ होतृव
रणस्यानन्हो नारं वृणीत इति प्रतिषेधात् औदुम्बरत्वेन च खादिरत्वबाधः प्राप्तबाध एव वक्तव्यः प्राकृतन्यायेन चो
दकस्य च खादिरत्वविषयत्वे प्राप्त्यभावात्तदनुपपत्तिः स्यादिति उच्यते नानीयप्रमाणविनियुक्तेनेतरस्य बाधने
तावदप्राप्तबाधने प्रकरणेन चानीयेतेन न तद्विनियुक्तौदुम्बरत्वेनेतरबाधनम् अप्राप्तबाध एव न द्वितीये कृतेन प्राकृ
तबाधः प्राप्तबाध एवेति कुलधर्मः वस्तुतस्तु प्राप्तबाध एवायं न च खादिरत्वस्य चोदकाविषयत्वेन प्राप्त्यभा
स्यभावात् कथं तद्बाधः प्राप्तबाधः तद्विषयत्वे वा तेनैव तन्नैराकांक्ष्यान्नौदुम्बरत्वस्य प्रकरणेन विनियोजकं स्यादिति वाच्यं
न हि प्राप्तबाधस्थले चोदकेन पदार्थाः प्राप्यन्ते तथा सति प्राप्तत्वेन बाधो न स्यात् किं तर्हि तानेव पदार्थानुवा
दतः प्रापयति विकृतौ न बाध्यन्ते ते च पदार्थाः प्रकृतिवद्विधिना प्राप्यन्त इति भवति प्रकृतप्रस्तावेऽप्राप्तिः यथा प्रकृ
तौ कृतं तथा विकृतौ कर्त्तव्यमिति सर्वे पदार्थाः प्राकृताः कर्त्तव्या इति अतस्तत्र प्राप्ताः खादिरत्वादयः [illegible] प्र
तिपन्नैरौदुम्बरत्वादिभिर्बाध्यन्त इति भवति तद्बाधः प्राप्तबाधः न च भ्रान्तिप्रतिपन्नेन वैयर्थ्याकांक्षा निवर्त्तयितुं शक्यते

राम:
२

तस्माद्युक्तमुभयाकांक्षातः प्रकरणं संभवादिति कृत्वा प्राकृतांगानामुपकारे न विधीयमानानामौडुम्बरत्वादीनां प्रकर।
णे विनियोजकमिति एवं दर्शपूर्णमासेनानुयाजान् यजतीति प्राकृतानुयाजानुवादेन विधीयमानं दर्शपूर्णमास
मपि प्रकरणाद्विकृत्यंगमिति केचिदाचार्याः। अस्मिन्नानवरणास्तवमाहुः दर्शपूर्णमासेहि अनुयाजानुवा।
देन विधीयते न तत्स्वरूपेणानर्थकत्वात् यागाङ्गत्वेन विकृत्यर्थत्वे लक्षणापत्तेर्युक्तं विप्रकर्षात् किं तर्हि सन्निधानाद्यागाङ्गः
याम न्यायेन तत्त्वार्थत्वमेव लक्षणापि तेन युक्तं सन्निकर्षात् अत एवोत्पन्नानां दीर्घाणां तदर्थत्वमपि युक्तं न युक्तं न।
वेमे अतस्तद्विधीयमानस्य दर्शपूर्णमासस्य वाक्यप्रतिपन्नेनानुयाजार्थत्वे लोके वैकल्पिकत्वात्प्रकरणाद्विकृत्य
र्थत्वं तमिति वयं त्वेषां कृत्वापि विकृत्यर्थत्वे ब्रूमः। भवितव्या विकृत्यर्थत्वेन दर्शपूर्णमासस्यानयापि च प्रक
रणे विनियोजकं भवतीति दृष्टप्रदृष्टभावेन हि यावत्कारित्वमायातिनावरौडुम्बरत्वविधानादुभयाकां
क्षासंभवात्कृतः प्रकरणविनियोगः एवं यावत्त्रयाजदृष्टभावेनान्यमायातिनावरेवयादि दर्शपूर्णमासं
विधीयते न तत्रोभयाकांक्षासंभवात् प्रकरणविनियोगो भवेत् न त्वेतस्मिन्नहि दर्शपूर्णमासेनानामसंख्या।
नं किंचित् दर्शपूर्णमासस्याप्राप्तत्वं विधीयते श्रौडुम्बरत्वमिवलादित्वस्यानापन्नं दर्शपूर्णमासस्य।
रीणामाद्रे चित्रनावाचित्वेन दृष्टत्वात् दर्शपूर्णमासस्य प्रकृतिवाचित्वात् अत एव नियमेष्वाज्यपा।

उ
१८

नियोवत्कल्पनं न तु दृष्टार्थत्वानिमित्तकं न च यावत्प्राकृताङ्गानामाम्नानं तावदेवविकारस्य विधानात्प्रकरणं।
विनियोगः संभवतीति वाच्यं न हि दृष्टार्थत्वाभावेन विकृतावन्यविशिष्टस्याङ्गस्य विधीयते विशिष्टविधाने
गौरवापत्तेः किं तु प्राकृताङ्गानामनुवादेन विकृतावागमो मात्रं विधीयते सोऽपि हि तेषां सौत्री तत्र विजः प्रवर्ततीति व
न तद्गतं दृष्टार्थत्वं चरणेऽपि न वागमो मात्रं विधीयते इति प्राकृतस्येवाङ्गस्य विकृतावागमो मात्रं विधाने।
मिति वक्तव्यस्य दीपिका एवं च विकृतेः प्राकृतेनाङ्गेन तत्कार्यापकारैः सह तयाजैर्नैराकांक्ष्यादिर्विधीयमा
नस्य विकृतावागमो मात्रं न तु प्रकरणेन विनियोजकं संभवति यदि हि प्राकृतस्य कस्यचि
त्स्थाने विकृतावागमो विधीयेत ततः पश्चात्प्राकृतानां विकृतेर्नैराकांक्ष्याभावाद्विकृतावागम
स्य वचनावरेवविधानादुभयाकांक्षासंभवात् प्रकरणविनियोगो भवेत् न चैतादृशः प्राकृतो गुणोऽस्ति
यास्यानुपपानानां च विकृतावागमे व विधानात् न पुनस्थानापन्नाभावाच्च न चाप्यदृष्टभा
वेन यावत्प्राकृतं निर्गुणत्वमाया सितावरेवास्य विधानात्प्रकरणं संभवतीति वाच्यं निर्गुणस्यापि हि।
तत्त्वेन पाणिकं दृष्टान्तवत्स्वेनागतत्वात् विकृतेस्तदाकांक्षाभावात् यथा हि ज्योतिष्टोमे दक्षिणादानसमये
विहितस्य विधानागस्य हि राज्ञो हि भूचोदकप्राप्तस्य प्रथमे द्विरात्रस्थाने द्वादशाहे दक्षिणादानसर्वं।

तम-
१८

कालीनैः पदार्थैः क्रत्वविधानं क्रतुपदेन साक्षाद्विहितत्वेनापेक्षितत्वात् सोऽपि तेषामेव स्वविधानं ततो नोऽत्र प्रका
रणाणि कं कृत्वं च सूत्रमपि विहितत्वाद्विभ्रणयामेदि ञ्च प्रीयमानैरेव विनियोगान्तरकालीनैः पदार्थैर्नापेक्षते।
तस्य प्रकृतेऽग्न्यर्थत्वविहितेनाग्न्यप्रीयत्वादिति चैत्रिवेणाक्षस्य विहितत्वेन विकृते न तस्य पेतानास्तीति तस्मा
दुभयाकांक्षायां संभवात्प्रकृते स्वसत्त्वेन प्रकरणमिति नियमः। प्रभवनीयस्य विनिविक्षरणान्निरुद्धे।
महाप्रकरणप्रकृतावेव विनियोजकं विकृतौ तु प्रयत्नप्रकृतवदत्रापि तस्य चोदकेनातिदेशेन विधीयमानस्य विनियोज
कं नन्वेकवचनं विधीयमानस्याङ्गत्वमुक्तमिति तन्न विकृतावपि प्राकृतस्य चोदकेनातिदेशेन विधीयमानस्यार्थ
धर्मयोरन्तरालेः पूर्वमङ्गकेवलपदाने नद्यपि प्रकरणेन विनियुज्यते यद्यपि विकृतेः कथंभावाकांक्षा।
प्राकृतैरेवाङ्गैः शाम्यति तथापि तत्र प्राकृतानां चोदकेन धर्मविधानं तत्र नहि धान्येषां चत्वतित्वात्
कथंभावाकांक्षायां न निवर्तते अन्तेनाविकृते सकांक्षा वनान्तरालेविहितस्यापि अपूर्वस्योपास्यभावाकांक्षा।
यास्ताऽनङ्गत्वं नस्य प्रकरणाद्विकृतावर्थं तत्र यथा प्रमत्तहोमेषु तेद्विप्राकृतानां चोदकेन विधीयमानयो
धर्मयोरन्तराले विधीयमानस्याङ्गत्वं तत्र प्रत्याहारविकाराकांक्षायां फलभावनायाः अन्तरालेप्रदेशभावनायाः
प्रकरणेन तत्त्वानन्तरप्रकरणेनाभिक्रमणादीनां प्रयाजादिशेषविनियोजकं नत्वसंदंशेनज्ञापनेऽन्तरभावे

अविशेषात्सर्वेषां फलभावनाकथंभावेन ग्रहणात्संदेशेनाम कस्तु द्वारेण विधीयमानयोरंगयोरंतरा
ले विहितत्वं यथाभिक्रमणेन हि समानयत्नेन त्वाद्यवपुरस्तात्स्वाहादिना प्रयाजाद्युद्वारेण किंचिदंगं विधा
यि विधीयते पश्चात्संप्रयाजाद्युद्वारेण यो वै प्रयाजानां मिथुनं वेदेत्यादिना किंचिदंगं विधीयतेऽतः
प्रयाजांगमध्ये पठितमभिक्रमणं तेषां भवति न तत्कथंभावाकांक्षायाश्रवणेनैः यथाहुः पारकारण
स्यानामंतेष्वस्यादिभिर्विभिः स्थानेषु तत्स्थैरेव संदेशेन तदिष्यतेऽति नचाग्नभावनायाः कथंभाव
कांक्षाभावात्कथं प्रयाजभावनाकथंभावेनाभिक्रमणं गृह्यतेऽति वाच्यं भावनासाम्येन सर्वत्र
कथंभावाकांक्षायाः सत्वात् प्रयाजैः सर्वैर्दर्शपूर्णमासावुपकारं भावयेदिति मुख्येनाङ्गेनानाग्ने प्रया
जैरुपकुर्वीतेति न संभवत्येव कथंभावाकांक्षाकथमेभिः सर्वैरुपकुर्य्यामिति साच संदेशपठितैर्वाच
निकैः स्वाहाकारादिभिः [illegible] भावेव स्वरूपनिषकारेण तत्स्वार्विर्होमत्वाद्येन निवृत्तेतेरविं
होमेषु हि स्वरूपविधारणानितिक्त लक्ष्यापारेण स्वयमेव नाप्यनिदेशेन तत्स्थामिधर्योगीयानां धर्मा
णां नाववत्वानिदेशेऽन्यायात्वेन होमत्वेन नैव स्तावकेन नापि होमीयानां कस्यहोमस्य धर्माः कस्मिन्
होमे प्रवर्त्तेरन्निति विशेषनिर्णयप्रमाणाभावात् अतो धर्मसाम्यभावात्ताद्विहोमेषुपि भावयेत्क

प्यमिति उपयज्ञाख्याकांक्षायाः स्वरूपनिष्पादनेनैव णाम्निति एवं येषु गेहु संस्थापनाभावात् तथोपयज्ञाख्याकांक्षा तेनैव
वतिवर्तनेन तस्य सर्वेषामनुग्रहोऽवगतस्तस्मात् क्रमभिन्नमभिक्रमणं प्रयाजानामिति नचैवमस्यान्तरप्रकरणे ।
महाप्रकरणे तृतीयः संदंशपतितानां पर्णानां कैमर्थ्याकांक्षायां प्रधानार्थत्वं स्वयाजानां यद्यपि सप्त ऽ
दिष्टमुपस्थितेरिति प्रकृतमनुसरामः नन्विहोभयविषयस्य प्रकरणस्य विनियोजकत्वं न दृष्टं स्या ।
न्नादिभ्रमाणामवलम्ब्य यत्र हि स्थानानारंगत्वं तत्र स्थानस्य प्रकरणत्वेन निराकांक्षत्वं नच साकांक्षत्वं निर
कांक्षेण सह तु योगं विनाकांक्षोत्थापनेन स्थानस्यापि नन्वाकांक्षायां यावदुभयाकांक्षारूपप्रकरणक
ल्पनद्वारा वाक्यादिकल्पनेन मारभ्यते इति विना वाक्यकल्पनेन वाक्यादिकं कल्पयित्वा विनियोगः क्रि
यत इति स्थानात्प्रकरणस्य बलीयस्त्वं अत एव विदेवनादयोऽपि अभिषेचनीयसन्निधौ पठिताश्च ।
पि नाभिषेचनीयस्यांगत्वेनान्तरंगत्वं च स्थानादुपदेशेन प्रकरणात् अभिषेचनीयस्याक्षदेवनादीना ।
मङ्गत्वेन सोऽनिर्देशमविकारत्वात् प्राकृतैरेव पदैर्निराकांक्षत्वात् किं तु प्रकरणाद्राजसूयाङ्गत्वं न
नु राजसूयेन स्वाराज्यकामो यजेतेत्यनु राजसूयपदस्य तावदाग्नेयपदार्थाख्यानपरत्वे ऐन्द्रोपयाख्यान
न चैवं प्रवर्तनेनेन च दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यत्र यथा दर्शपूर्णमासपदं नामधेयम ऽ

उ
२०

विनाख्यातपदं नेत्रं न ह्यपजेनेनाख्यातमविशेषात्सर्वानेव प्रकृतानाग्नेयादीन् प्रयाजादीन्वाभिधातुं समर्पयेद्दर्श
पूर्णमासपदेनाग्नेयादीनेवेत्युक्तं न सर्वानिति नन्वाख्यातपदं नैवं यजनस्य पदस्यापि किं न स्यादिति वाच्यं प्र
सिद्धं न हि पदेनाप्रसिद्धं नीयते यथाहुः पदमज्ञातसंदिग्धं प्रसिद्धैरर्थमुख्यकृत् स्मृतेति निर्णीयते निरूढं तेन स्वार्थार्पण
नीयतं न निरूढं दर्शपूर्णमासपदं चकारेति मितं तद्यागस्याग्नेयादिष्वप्यभिधानं वा केवलं गतः अनन्तहाविर्त्वेन दर्शपूर्णमा
सपदं प्रसिद्धं न चाग्नेयादीनां बहुत्वाद्द्विवचनानन्तरमसामञ्जस्यमिति वाच्यं विहुदाकादयपसिद्धसमुदायद्वयाभिप्रा
येणानुपपत्तेः एवं च दर्शपूर्णमासपदस्याग्नेयादिवाचित्वे निर्णीते यजेनेनाख्यातमपि तानेव वदेदिति न हि नडकौ
स्यार्थस्यागो भवति यजनस्य पदेन निर्णीतार्थं अनन्तराख्यातपदं तमेव वदन्न्याविशेषात्सर्वेष्वपि पशुसोमेषु वि
धत्ते नन्वेवं न तावद्यजनस्य पदस्यापि मानेव वदतीति न वाजनस्य यत्र पशुस्वाराज्यजा स्यपने यजेति पुनर्मासे माभिषवनिमित्तना
न्नस्य च सोममभिषुणोतीति वाक्येन सोमयागेषु वाजनत्वान्नहाविर्त्वमेवं नेति पशुवाचित्वमिति वाच्यं नन्वाभिषवनी
यादि सोमयागेष्वभिषवः प्रयत्नेन वाक्येन चोदनोऽस्ति न हाकस्मात्योतिष्ठामे संज्ञान् अतिदेशान्न संबंधो वगन
इति चेन्न अतिदेशस्य फलसंबंधोत्र कालीनत्वेन न स्वाराज्यकामो यजेतेत्येन हाकाङ्क्षावगमस्तत्र का
लीनत्वात् अनेन न हि वाक्येन फलसंबंधो बाधितेऽपश्चात्कर्षभावाकाङ्क्षापामनिदेशात्कल्पनात् अनन्तरतः प्रागे

राम
२०

वैनद्वाकाण्योर्वर्णनीयत्वसूचाभिषवस्थानत्वेनाननानं राजसूयपरमप्रसिद्धार्थमेवमनएवराजसूयपरमप्रु॰
त्यद्ममणुकरणंपाहवरिमुक्तंसंप्रदायिकैः एवंचाप्रसिद्धार्थत्वेनाख्यानपरतंत्रन्याद्राजसूयपदेनेष्टिपशुसोम
यागाउच्यंतेनेनचैतेतैः प्राकृतैर्धर्मैर्निराकांक्षत्वादनेनप्रकरणं विदेवनादीनांराजसूयेविनियोजकंउभयाकांक्षाया
अभावात् नचप्रातिस्विकरूपैर्नैराकांक्ष्येपिराजसूयत्वेनरूपेणनैराकांक्ष्यमितिवाच्यं आकांक्षाहेतोप्रमाणा
भावात् किंचप्रातिस्विकरूपेणाकथंभावाकांक्षायामपिफलसंबंधांशेकालस्यराजसूयत्वेननतुप्रातिस्विकरूपैः
राजसूयत्वेनचफलसंबंधेऽन्वयाद्याः कथंभावाकांक्षायाः विदेवनादिभिः शान्तेरनिरेशाकल्पनमेवनस्यात् य
दिहिसामान्यरूपेणप्रातिस्विकरूपेणचफलसंबंधविधायिवाक्यद्वयंभवेत्ननराजसूयेनापि आकांक्षाहेत्वनुसारे
णविदेवनादीनामतिदेशिकानांचांगानांसंबंधोननुनरस्तितस्मात्प्राकृतैर्धर्मैर्नैराकांक्ष्यान्नविदेवनादीनां
प्रकरणंविनियोजकमितिचेन्सत्यं अतएव सांप्रदायिकैर्विदेवनादीनांसंदंशपतितत्वेनः राजसूयत्वप्रकारो॰
णेयधर्मविधियंनेराजसूयपदस्यनाउन्नुवानीयवमारायलक्षणापोविदेवनादयः पठ्यंते अतस्तसर्वेराजसूया
गंप्रधानाङ्गवारेनविधीयमानधर्मसमध्येपठितप्रधानांगाभिक्रमणादवत् तस्मात्क्रतुकंपकेविदेवनादीनांप्रक
रणाद्राजसूयांगत्वमितितन्निरूढंप्रकरणस्थस्थानाद्बलीयस्त्वमिति देशसामान्यस्थानेनाद्बिविधं पाठसा
देश्यमनुष्ठानसादेश्यंचेति यथाहुः नचक्रमोद्विधेवेष्टोदेशसामान्यलक्षणः पाठानुष्ठानसादेश्यविनियो॰

उं
२१

गस्य कारणमिति स्थानं क्रमभेदेन न पर्यन्तं पाठसारेण प्रविहितविधेयं यथा स्वपाठः सन्निधिपाठश्चेति यथैन्द्रा
ग्नमेकादशकपालं निर्वपेत् वैश्वानरं द्वादशकपालं निर्वपेदित्येवंक्रमविहितेष्वैन्द्राग्नी एव चतुरादिवैश्वानरीया
याज्यानुवाक्यामन्त्राणां यथासंख्यं प्रथमस्य प्रथमं द्वितीयस्य द्वितीयमित्येवं यो विनियोगः स यथासंख्य
पाठात् प्रथमपठितमन्त्रस्य हि कैमर्थ्याकाङ्क्षायां प्रथमसंविहितेन कर्मणैव प्रथमस्य प्रथमोपनिष्ठत्वे समानदेशत्वा
त् यानि तु वैकृतानि अङ्गानि प्राकृतानन्तरं विहितानि तेषां विकृत्यर्थं तत्सन्निधिपाठात् तेषां हि कैमर्थ्याका
ङ्क्षायां फलवद्विकृत्यर्थं वैमेवम्भाव्यत्वेन संबन्धेनोपस्थितत्वात् अत एव तेषु नु विष्णुक्रमाणामवतारः सन्नं
र्थफलार्थं न विकृतिसन्निधिपाठादर्थकाण्डेषु पशुधर्माणामग्नीषोमीयार्थं न अनुष्ठानसारेण्यान् ।
गौ पवसथ्ये हि अग्नीषोमीयः पशुरनुष्ठीयते न तत्सन्निधौ विहिते नेपथ्यौः पशौ ते अत एषां कैमर्थ्याकाङ्क्षायामनु
ष्ठीयमानत्वेनोपस्थितेन यः स्वेदं वैमेवम्भाव्यत्वेन संबध्यते अतो युक्तं अनुष्ठानसारेण प्राप्तत्वं तेषां न च पाठसारेण पा
ठे एव न तत्किं न स्यादिति वाच्यं अग्नीषोमीयस्य पशोः क्रतुसन्निधौ पाठात् न च क्रतुसन्निधौ न स पाठेन तत्र
नमपि न तस्यादिति वाच्यं सवनीयहि दैवतः पशुरौपवसथ्येऽह्नि आलभ्यस्तदितिवचनात्तदुपपत्तेः न च स्यात्
मकारणस्य सवनीयस्य तेन पशुधर्माणामग्नीषोमीयार्थं तस्मैवकिं न स्यादिति वाच्यं न सवनीयापत्वेन पशुप
संग्रहणेनोपस्थितत्वात् अतस्तान्यर्थप्रतिहतानां विपरीतेन वाद्यवलम्बिनि न्यायात् स्थानानुष्ठायायार्थं न पर्व

धर्मांतरणपुरुषं नवत्रेषांनरर्थं नेमकं रणादेवयादिति लिंगचाचं अगृहीतोसौपकयंमानाकां सायाः स्मोपकारैः।
ग्राकृतत्वयमैवेणरवाननात् संहितसांत्रापत्यानामप्रकृतिकः अवधेः पञ्चप्रभवन्नसामान्यात् तदुक्तं सांत्रापत्यवा
न्नप्रभवत्वादिति सांत्रापत्यरथितपसीनयपञ्चानाः पंचापत्यानामप्रकृतिकः सात्वाना पञ्चप्रभवत्वात् अतएवाह।
कथमेतत्हर्षैनितरकां तत्वात्रपञ्चपापोय मांएणयकरणाविति निधोजकं किंतु स्यानभेवनदेवनिरूपणः स्यान
विनियोगः तेष्वसमाख्यानः प्रबलस्यानविनियोगेहि परार्थयोर्दृष्टान्तमानलक्षणः संबंधः प्रमाणः स
माख्याविनियोगात्तुसंबंधोनप्रमाणः परार्थयोर्मिथ्रेऽपरत्वात् नचसासंबंधवाचिकायौगिकानामशक्यत्वा
दयावाचकत्वेनसंबंधस्यावाचकत्वात् तथाहि समाख्यासंबंधसामान्यवाचिकानहिविशेषवाचिकाना स्या
त् नाद्यः तदुक्तौ प्रयोजनाभावात् संबंधयौगिकशब्दानामपर्यायत्वापत्तेश्च हितीयेः वक्ष्यमाणसंबंधिनौ वा
यौ नन्वेतरेणसंबंधविशेषाभावात् संबंधिनस्तद्विनिपत्तिः तेनेतरसंबंधप्रतिपत्तेश्च स्वस्थानपत्त्यांसंबंधिवा
चकत्वं समाख्यायावत्तन्नायावतसंबंधवाचिकत्वं संबंधिप्रतिपत्तेर्वा कार्यं प्रतिपत्तिमात्रेण तत्समि
पत्तिसंभवेनव्यापारकत्वनेगौरवात् यथाह संबंधयौगिकेष्वंशे हि इत्यमेव विपरीतमेनहि संबंधवाच्य
त्वसंभवतानियोगाहादिति नियापारकं तथापि विवाहकर्मोपपयस्तलयागाकयुक्तः प्रकः कर्मोवाचौनेः।

कस्यकस्यचिदिति । नन्वाचसमाख्यानसंबंधवाचिकाहोत्रमसमाख्यादिकातु वैदिकी समाख्यानिघारस्यापि
शब्दवशान्नषष्ठ्यर्थसंबंधवाचिकानापिवाक्यवत्तलहोपिकानस्याः पवत्वेनाप्रमाणत्वात् पौरुषिक
मिमादिसमाख्यानं अनिर्द्धर्मलालौकिकत्वेन उक्तदोषप्रसंगसापेक्षत्वात् काण्डगोचरत्वेननप्रमाण्या ।
गोचरत्वाच्च काण्डवाचकत्वमपि न काण्डनेन किंचपौरुषाधिकत्वादिनैवन नपौरुषहायनीमञ्जुइत्यत्रा
यकोपि गोत्वेनन हस्तिनि किं तर्हि एकहायनीत्वेनेवस्यानविनियोगेन्वयपदार्थयोर्विशेषणपुरस्कारेणे ।
वसंबंधः प्रमत्तप्रमाणप्रतिपन्नः अतश्च समाख्यास्तुपदत्वप्रत्ययनयोः पदार्थयोः संबंधस्ततिर्या
वत्कल्पनेनाव्यवस्थप्रतिपन्नेन संबंधेन प्रपरस्परमाकाङ्क्षानहमावेचसंबंधानुपपन्नेः कल्पितसंबं
धेन च पावरिरन्याकाङ्क्षादिकल्पनानावेरन्याकाङ्क्षपाचकादिकल्पनयाविनियोगः क्रियतइ
तिसिद्धं स्थानस्य समाख्यानः प्राबल्यं अतएव श्रुत्पनमेयः सन्नाप्यपाञ्चाग्निपाठसाहस्रपाञ्चन्वपौरो ।
डाशिकसमाख्यया पुरोडाशिपात्राणामिति । समाख्यायौगिकः शब्दः सा च द्विधा वैदिकी लौकि ।
की च तत्र होतृचमसभक्षणमन्त्र होतृचमसइति वैदिकी समाख्यया अध्वर्योस्तन्न मार्जनत्वेनलौ ।
किका आध्वर्यवमिति समाख्ययेति संक्षेपः एवं निरूपितानि संक्षेपतः श्रुत्यादीनि षट्प्रमाणानि

५८८
२२

राम.
२२

एतत्सहकृतेन विनियोगविधिना समिधादिषु हृपक्षे नवर्षे हतिमासाभ्यां येनेनेन्ये वेष्टयेत्यानि विनि
युक्तेनेनानुगानि मानि हि विधानि सिद्धरूपाणि क्रियारूपाणि चेतनानि च सिद्धानि आनि इत्यसंख्यातेति
मानि हतायोन्येव क्रियारूपाणि च हि विधानि गुणकर्माणि प्रधानकर्माणि चेति एतान्येव संनिपत्यो
पकारकाणि आरादुपकारकाणि नियोग्याने नयकर्माणि इत्याह् हेयेन विधीयमानं कर्म संनिपत्योप
कारकं यथा वनु प्रोक्षणादिना हत्याह ह्रस्वार्थेन हर्षार्थं च हस्ताह्रस्वार्थं च ह्रस्वार्थमवघातादिभिः ह्रस्वार्थं प्रोक्ष
णादि हस्ताह्रस्वार्थं पश्चुपरोडाशयागादिना हि द्रव्यनाशं नाहत्येकेन हत्येन चैवं नास्य एतत् हत्येकेन
द्रव्येनैव याग्यकर्मस्वनेन संनिपत्योपकारकं हि विधिं उपयोगसमाप्त्यर्थं उपयुक्तार्थमवेतिनत्वाद्या
नयोगक्रमेण पयोगसमाप्त्यर्थं व्रीहीणां यागेउपयोगस्य समाप्त्यर्थं न प्रतिपत्तिकर्मद्रव्यमलक्षणं यथापयुक्त
पुरोडाशसंस्कारकं उपयुक्तस्यावभृथे कण्टकानि वद्वत्कं कर्म प्रतिपत्तिकर्मउपयुक्तं संस्कार्यत्वमुपयो
गात्संस्कार्यत्वं पुर्वेणोपयुक्तात्वयागउपयोगसमाप्तो अवभृथे अवयव प्रायश्चित्ते निक्षेपस्य उपयुक्तस्य
संनिपत्योपकारकं यतो निक्षेपस्य निर्गमाणार्थं नवनवनस्य न दर्शे निक्षेपस्य उपयुक्तत्वादिविषक्रमकार्यं
तेन संनिपत्योपकारकमारादुपकारकाह लोपः नन्वग्रवघातादिभवस्य नामवलीयकस्य ह्रस्वार्थं च हेना

न। आराडुपकारकस्य चाहष्टार्थत्वात् दृष्टेच संभवति अदृष्टस्यान्याय्यत्वात् प्रोक्षणादिसंनिपत्योपकारके
न कथं बलीयः। अथोच्यते दृष्टार्थत्वाविशेषात् किंच आराडुपकारके साक्षात्प्रधानांगत्वेन समन्योद्देश्येन।
विधानात् सन्निपत्योपकारकेन अंगांगिकर्मांगव्रीह्यादिफलहेत्वेन विधानात् अंगाश्रयत्वया साह्यादे
र्बलीयः। अंगगुणविरोधेनास्यांगादिनिन्याय्यत्वात् अतएवच दृष्टार्थस्थानासंभवेन यज्ञेनसोमाना।
व्यायांपौर्णमास्यांवाद्यजेतेतिन्यविशेषविधानेविपर्ययोऽत्रग्रहः। सोमयागस्यैवविकृतियजेनबलीयस्।
तीयात्वे। अतः कथंसन्निपत्योपकारकस्यबलीयस्त्वमुच्यते सत्यदृष्टार्थत्वाविशेषात्सन्निपत्यो
पकारकमाराडुपकारकाद्बलीयः सन्निपत्योपकारकेहिकर्मणोउपकार्योपकारकयोर्व्रीह्यादिप्रोक्षणयोः संबं
धोव्याकरूपः उपकारमात्रेण तु कस्यच्चाराडुपकारकस्यलेशतर्शपूर्णमासप्रयाजयोः संबंधः कस्य। उपकार
त्वि किंचाराडुपकारकस्यलेशिप्रकरणेविनियोजकेऽनन्तरव्रीहीनप्रोक्षणीतिवाक्येनव्रीहिपरेनापूर्वे।
सायन्नलक्षणक्रमाकृतोविनियोजकमपिनिबलीयस्त्वयुक्तं अंगगुणविरोधेनास्यांगादिनिन्यायेनतुवे
लवमितितरसत् नहिव्रीह्यादिफलहेत्वेनविधीयमानेप्रोक्षणादिसंस्कारेभवतितन्त्वतृणस्यानर्थक्यात् किंच
संस्कारहारकत्वर्थमेवसन्निपत्योपकारकाणामयमपूर्वेयमश्रुतनस्यचवस्यमाणत्वात् अतएवविधयम

पकारकाणां दृष्टेवमसंस्कारहोमयागास्वरूपेणोपयोगादुत्पन्नमपूर्वार्थत्वं श्रुतपदौषधपशोवधामाहीना॰
मांशेन यहृन्निसेलषामाम्येयापूर्वं यपूक्तात्वासम्यच्यतनर्थत्वाभावात् रिस्रुक्तं स्त्रीयत्वादुपकारकाणान्न॰
स्वरूपे श्रुत्पयोगात् परमापूर्वार्थत्वेनत्वेनमपूर्वं सयागास्वरूपाडुक्तानानेन स्वेवोमपघमानत्वान्न सप्तिप॰
त्वोपकारकाणां पूर्वांगानां नडुत्पत्त्याद्युपयोगः उक्तंगानांन्वेषांनस्थितत्वादुपयोगः परमापूर्वं स्वनसांग॰
प्रयोगाद्युक्तानानेनेमेव उत्पद्यमानत्वात्स्वैषामाराडुपकारकाणां नडुत्पत्त्रौ प्रयोगवहिर्भूतस्य च ननस्थिता
नुपयोगः यथाहृहस्यनिसवस्यवाजपेयेनहृाहृहस्यनिसवेनयजेतेतिवाजपेयोत्तरकालमपानेन विहि॰
तस्यवाजपेयापूर्वे स्थितत्वादुपयोगः तस्यप्रयोगमसत्वारिप्सुकत्म यत्नर्थं नसिद्धं सर्वयागानामपूर्वार्थ॰
त्वं प्रकृतमनुसरामः तदेवं निरूपितः संक्षेपतो विनियोगविधिः प्रयोगप्राशुभावबोधको विधिः प्रयोग
विधिः सचांगवाक्यैकवाक्यतामापन्नः प्रधानविधिरेव सहिसांगप्रधानमनुष्ठापयन् विलंबे प्रमाणा
भावादविलंबापरपर्यायं प्रयोगप्राशुभावं विधत्ते नच विलंबे अविलंबेपि प्रमाणाभावात् विनाच्य विलंबे
हि सांगप्रधानविध्येकवाक्यतानवगतत्वस्याहिस्यानुपपत्तिः प्रसमनेन हि विलंबेन क्रियमाणयोः पदार्थ॰
योः सहकृतमितिसाहित्यं व्यवहरंति नचैवं साहित्यानुपपत्त्या समानकालत्वमेवस्याच्चनविलंबः श्रवव॰

धानेन पूर्वोक्तकालक्रियमाणपदार्थयोः प्रविलंबेन क्रमनियमो व्यवहारादिति चेद्वाच्यं अनेकपदार्थानामेक
स्मिन्काले ऽनुष्ठानानुपपत्तेः न च नानाकर्तृसंपादनेनानुष्ठाने किं न स्यादिति वाच्यं नस्यैनस्वपक्षकृतोऽस्य
नानकर्तृनरस्यादिनाकर्तॄणां नियतत्वात् तस्मादेकस्यावाकेकयाकालानामापन्नः प्रधानविधिरेकवाक्यताव
गतनस्यादिविरहप्रसङ्गाद्विधिपदस्य एककालानुष्ठानानुपपत्तेर्विलंबविधानमिति सिद्धं प्रयोगप्राशुभाव
बोधको विधिः प्रयोगविधिरिति स चाविलंबो नियते क्रमे आश्रीयमाणो भवति अन्यथा हि किमेतदनन्तरं न
ऽमेनन्तरं चमेन कर्तव्यमिति प्रयोगविलंबापत्तेः अतः प्रयोगविधिरेव स्वविधेयप्रयोगप्राशुभावसिद्ध्य
र्थं नियतं क्रममपि पदार्थविशेषणतया विधत्ते तत्र क्रमो नाम विततिविशेषः पौर्वापर्यरूपो वा तत्र च षट्
प्रमाणानि श्रुत्यर्थपाठस्थानमुख्यप्रवृत्त्याख्यानि तत्र क्रमपरवचनं श्रुतिः तच्च द्विविधं केवलक्रमपरं
विशिष्टपदार्थपरं वेति तत्र वेदं कृत्वा वेदिं करोतीति केवलक्रमपरं वेदिकरणोद्देशवचनान्तरेण विहितत्वा
त्तद्वषट्कर्तुः प्रथमभक्ष इति क्रमविशिष्टपदार्थपरं एकस्मिन्नाभिगमवचनेन भक्षानुवादेन क्रममात्र
स्यविधानसमयाकालानां सेयज्ञनिर्णितिरप्रमाणापेक्षया बलवती नैषां वचनकल्पनाद्यापाक्रमप्रमाणत्वा
न अन्नपचादिषिन रूपपाठक्रमाद्बलीयस्यानेग्रहणप्रसङ्गोऽग्निहोत्रहोमयागस्याने इति वचनाद्यहणाम

स्यात्तेष्वग्रहणमित्युक्तं यत्र न प्रयोजनवशेन निर्णयः क्रमार्थः क्रमः यथाग्निहोत्रयवागूपाकयोः श्रुतिरिय
गामवाहेमार्थत्वेन तन्माक्रः प्रयोजनवशेन शब्दस्यानुष्ठानेपि सर्वत्र पाठक्रमान्न बलवत्त्वं यथापाठं मन्त्रस्या
नेकमप्रयोजनबाधः अग्रहणार्थत्वेन च स्यान्नदिहोमानन्तरं क्रियमाणस्य किंचिद्दृष्टं प्रयोजनमस्ति पदार्थ
बोधकवाक्यानां यः क्रमः स पाठक्रमः तस्माद्युपदार्थानां क्रममपेक्षमाणानां येन येन हि क्रमेण वाक्यानि पठि
तानि तेनैव क्रमेणाधीतानि स्वार्थं प्रत्याययन्तीति यथार्थं प्रत्ययं च पदार्थानामनुष्ठानानामस्य पाठो हि
द्विधः मन्त्रपाठो ब्राह्मणपाठश्चेति तत्राग्नेयाग्नीषोमीययोर्यथा लिङ्गधात्वादिवाक्यात् क्रमापेक्षः क्रमप्राप्ती
यते स मन्त्रपाठात् स चायं मन्त्रपाठो ब्राह्मणपाठाद्बलवान् अनुष्ठाने ब्राह्मणवाक्यापेक्षया मन्त्रवाक्य
स्यान्तरङ्गत्वात् ब्राह्मणवाक्ये हि प्रयोगाद्बहिरेव स्मर्तव्ये कर्तव्यमिति मन्त्रबोध्य कर्तव्यमिति न पुनः
प्रयोगकाले ब्राह्मणवाक्ये मन्त्रास्तु तत्रानन्यप्रयोजनाः प्रयोगसमवेतार्थस्मारकाः इति वक्ष्यामः तेना
नुष्ठानक्रमस्य स्मरणक्रमाधीनत्वात् तत्क्रमस्य च मन्त्रक्रमाधीनत्वात् तेषां मन्त्रपाठस्य बलवत्त्वमिति व
लवान् यथाग्नेयाग्नीषोमीययोर्ब्राह्मणपाठादाग्नीषोमीयानुष्ठानेन पश्चादाग्नेयानुष्ठानं प्राप्ते
यं क्रमं बाधित्वा मन्त्रपाठादाग्नेयानुष्ठानेन पश्चादाग्नीषोमीयस्यानुष्ठानक्रम उक्तः प्रयाजानां समि

योयन्ति तन्नूनं न तेषां यन्नीत्येवं विधायकवाक्यात्क्रमाय: क्रम: स्वब्राह्मणपाठक्रम: अत्र चैवं यद्यपि ब्राह्म
णवाक्यानर्थ्यं विधायकत्वं नार्थ्यान्तित्तथापि प्रयाजानां स्मारकत्वं न स्मृतभावानां येव स्मारकत्वेन स्वीक्रिय
तेन यावच्येन क्रमेण मन्त्रा यथोक्तानि तेनैव क्रमेणार्थं स्मरणं न चयेनोनित्युक्तं तेनैव क्रमेण तेषामनुष्ठानं।
मिति तन्निरुद्धं प्रयाजानां ब्राह्मणपाठक्रमात् क्रमः इति तन्न प्रयाजेषु प्रयोगसमवेतार्थस्मारकत्वं विधा।
यकत्वेन कल्प्यते नार्थान्ताब्राह्मणवाक्यानां किंमिति स्वीक्रियते प्रयोगसमवेतार्थस्मारकाणां यागमन्त्राणा
मात्रेयादिष्विवायापि सत्वात् न च तेषां देवतास्मारकत्वात्क्रमस्मारकत्वेन ब्राह्मणवाक्यं स्वीक्रियत इति
वाच्यं आग्नेयादिष्वपि कर्मस्मारकत्वेन न स्वीकारापत्तेः नचेष्टापत्तिः तथा सति ब्राह्मणपाठान्मन्त्रपाठस्य
बलीयस्त्वं न स्यात् दुर्बलीयस्त्वं हि मन्त्राणां प्रयोगसमवेतार्थस्मारकत्वमितरस्य तदस्मारकत्वं हेतुः यदि क
र्मस्मारकत्वं ब्राह्मणवाक्यस्य स्वीक्रियते तदा तद्यथा न स्मारकत्वेन ब्राह्मणवाक्यस्यापि नरागतारेण भवेद्देवतास्मा
रकत्वेन च मन्त्राणां बहिरंगत्वान्मन्त्रपाठाद्ब्राह्मणपाठक्रमस्यैव बलीयस्त्वं स्यात् तथा च मन्त्रेऽनन्तु विरोधे स्मारि
ति याचमिकाधिकरणविरोधः न च हि ब्राह्मणपाठान्मन्त्रपाठस्य बलीयस्त्वाद्दार्ढ्यै आग्नेयाद्यनुष्ठानं पश्चा।
दग्नीषोमीयस्येत्युक्तं अग्न्याग्नेयादिष्वपि मन्त्राणां देवतामात्रप्रकाशनद्वारा कर्मप्रकाशकाकाङ्क्षमानद

उ॰
२९

गोद्देशपठनस्य पठनादेवत्वनात्सेति चेन्न तुल्यं प्रयाजेषु न मा विहिया या मंत्रा देवताप्रकाशकाः प्रयाजेषु दे-
वताया मांत्रवर्णिकत्वात् नचात्र प्रयाजेषु याज्यामंत्राणां देवताप्रकाशनद्वारा कर्मप्रकाशकत्वाल्लिंग-
मेमंत्रपाठादेव स्यात् न तु ब्राह्मणपाठक्रमात् नतु मंत्रपाठस्यान्याहरणत्वात् प्रयाजक्रमो ब्राह्मणपाठ
क्रमादेवेति वाच्यं अन्याहरणेनेव सोपक्रमस्यानुष्ठानं स्यात् मंत्रक्रमस्य बलीयस्त्वात् अभ्यासादिकर-
णेच वाग्निकक्रमस्य क्रमविनियुक्तैर्वलिंगकमंत्रवर्णैर्नादिना प्रयाजेषु याज्यामंत्राणां क्रमविनियोगा-
उक्तः नतु मंत्रं तत्र तत्र समिधो अग्न आज्यस्य व्यंत्विमादिभिः क्रमप्रकरणप्राप्तैर्मंत्रैर्देवतागुणत्वेन समर्पणे
ऽस्त्युक्तं मंत्राणामन्याहरणक्रमत्वेन तत्रुपपत्तिः स्याम् तत्कथं प्रयाजेषु ब्राह्मणपाठक्रमात् नत्वनेषा-
मेव प्रयोगसमवेतार्थस्मारकत्वात् प्रयाजेभ्याहरणे तत्कृतत्वाद्विप्रयाजत्वब्राह्मणवाक्यानां प्रयोगस-
मवेतार्थस्मारकत्वाभावात् यथाकृतार्थवाक्यवाक्यार्णवार्थनिककाराः प्रयाजादिवाक्यानामर्थसमर्पकवि-
नार्थानिरूपणसंस्पर्शैः समपि प्रयोजनं तान प्रनिपद्यतद्रूनिलस्यात् मंत्रककर्मणां पाठक्रमो मंत्रपाठा-
त् अमंत्रकपाठक्रमस्तु ब्राह्मणपाठक्रमादेवेति निदिक् अक्रतौ नानादेशानां पदार्थानां विकृतौ च वचना-
देकस्मिन्देशे अनुष्ठाने कर्मैकप्रयत्नसादेशेऽनुष्ठीयमानेन स्वप्रथममनुष्ठानं तस्याश्रपश्चादन्यत् क्रमः स

याग
२९

स्थानक्रमः स्थानं नाम उपस्थितिः यस्मिन्हि देशेऽनुष्ठीयते तेन सर्वं तेन परार्थं कृते सर्वप्रथममुपस्थि
तं भवतीति युक्तं तस्य प्रथममनुष्ठानं अत एव यस्मात् आग्नीषोमीयसवनीयानुबन्ध्यानां सवनीयदे
शे सहानुष्ठाने कर्तव्ये आदौ सवनीयपश्वनुष्ठानं तस्मिन्देशे आश्विनग्रहणानन्तरं सवनीयस्यैव प्रथ
ममुपस्थितेः इतरयोश्चापकर्षात् तथाहि ज्योतिष्टोमे त्रयः पशुयागाः आग्नीषोमीयः सवनीयोऽनुब
न्ध्यश्चेति ते च भिन्नदेशाः आग्नीषोमीयो औपवसथ्येऽहनि सवनीयः सुत्याकालेऽनुबन्ध्यास्त्वन्ते साद्य
स्को नाम सोमयागविशेषः स चाग्निष्टोमविकारः अतस्तत्रापि पशुयागाः साद्यस्क्रे
तु एकप्राप्ताः तेषां तन्त्रेण साहित्यं कृतं सह पशूनालभेतेति तत्र साहित्यं सवनीयदेशेन सत्प्रथमान
प्रयासन्नेः स्थानातिक्रमसाम्याच्च सवनीयदेशेऽनुष्ठाने क्रियमाणे आग्नीषोमीयानुबन्ध्ययोः स्व
स्वस्थानातिक्रमसाम्येऽपि भवति आग्नीषोमीयदेशेऽनुष्ठाने क्रियमाणे सवनीयस्य स्वस्थानस्यातिक्र
मसाम्येऽनुबन्ध्यस्य तु स्वस्थानातिक्रमः सवनीयस्थानातिक्रमश्च स्थानद्वयमनुबन्ध्यदेशे आग्नी
षोमीयस्य द्वयम् तथा च सवनीयदेशे सर्वेषामनुष्ठाने कर्तव्ये सवनीयस्य प्रथममनुष्ठानं
आश्विनग्रहणानन्तरं हि सवनीयदेशः सङ्कृतौ आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं स

२८

वतीयपञ्चपाकाङ्गोतीमांसात्विनश्रहणात्वेनांशेतसविहितत्वात् तथाच सायस्कृत्याश्विनग्रहणोक्तेनसवनीयप
नोपस्थितेनाभवतीतिदुक्तं तस्यसानाम्ययमनत्तुष्ठानेदतत्पोऽस्मयष्माहितत्वात् प्रथानक्रमेणायागानानक्रम।
आग्नेयेनेसमुत्क्रमः येनदिक्रमेणप्रधानाङ्गक्रियेतेनेनैवचोत्क्रमेणतेषामङ्गानिसमनुष्ठीयेतेनेतदासर्वेषा
मङ्गानांसप्रधानैस्तुल्यंसम्बधानंभवतिसुत्क्रमेणतन्त्रुष्ठानेकेषांचिदङ्गानांहेः प्रधानैःसंयतसम्बधानम
सेषामसंयतसम्बधानेस्यात् तथाचक्तं प्रयोगविधवगतसाहित्यबाधापत्तेः अतः प्रधानक्रमोऽपिसंगक्रमे
हेतुः अतएवप्रधानसेषांचानामाग्नेयहविषोऽभिन्नत्वेनपश्चादैन्द्रस्यहविः आग्नेययागैन्द्रयागयोःपैर्वाप
र्यात् अतो हिदुषोरभिन्नत्वेनतेनतेनप्रधानेनतत्संपर्कांतन्नित्यसम्बधानंभवति आग्नेयहविरभिन्ना
णामाग्नेययागयोरैन्द्रयागहविरभिन्नत्वेनतत्सम्बधानात् ऐन्द्रयागहविरभिन्नत्वेनैन्द्रयागयोराग्नेययागे।
तत्सम्बधानात् अतस्माद्भवाग्नेयहविरभिन्नत्वेनतत्त्वैन्द्रस्यहविषः ततःआग्नेययागः ततश्चैन्द्रयागाद्
भेदेनक्रमोऽत्रुत्क्रमात्सिद्धोभवति यदित्वाद्यवैन्द्रहविषोऽभिन्नत्वेनतत्राग्नेयस्यक्रियते तत्प्रयाजाद्युत्क
र्षात्क्रमतत्वात्स्वाग्नेयस्यानुष्ठानाग्नेययागतन्त्रेणहविरभि न्नत्वेनतत्सम्बधाने ऐन्द्रयागतन्त्रेणाह
विरभिन्नत्वेनतत्सम्बधानेस्यादन्यत्र तथाहि अतएवप्रधानयोरेकत्वाभिन्नत्वस्यपुत्रक्रमात्क्रमः।

रामः
२८

मइति सचायंमुख्यक्रमः पाठक्रमाद्दुर्बलः मुख्यक्रमो हि प्रमाणान्तरसापेक्षप्रधानक्रमप्रतिपत्तिसापेक्षत्वा
द्विलम्बितप्रतिपत्तिः पाठक्रमस्तु निरपेक्षस्वाध्यायपाठक्रममात्रसापेक्षत्वेनयानन्तर्येनतिबलवान् अतएवाग्ने
योपांशुयाजाग्नीषोमीयानांक्रमेणानुष्ठीयमानानामुपांशुयाजान्तर्निवेशेमुख्यक्रमाद्दुर्बलंमन्त्रपाठक्रमेनेन
एवदुर्बलत्वात् पाठक्रमात्त्वपकर्षानुष्ठीयतेनेनप्रयाजस्यबलवत्त्वादिति सचायंमुख्यक्रमः प्रवृत्तिक्रमाद्बलवान्प्रवृ
त्तिक्रमो ह्याश्रीयमाणेबहूनांसङ्गानांप्रधानविप्रकर्षोभवति मुख्ये त्वाश्रीयमाणेसन्निकर्षः तथाहर्षणा
णांमासयोरन्तराग्नेयानुष्ठानेनतस्यसाङ्गस्याग्नेयस्यतद्धर्मास्वकेविप्रकर्षेमन्त्रपाठेन तेनप्रवृत्तिक्रममासत्वस्य
तद्धर्माः सर्वेपूर्वेमनुष्ठीयेरन्ततः आग्नेयधर्मा स्तत्तद्धर्माणां स्वप्रधानेनसहद्वाभ्यामाग्नेयधर्मैरनुष्ठाना
नांविप्रकर्षःस्यात् यदातुसान्नाय्यधर्माणांकेषांचित्सर्वेमनुष्ठानेपिश्चसर्वेषुमुख्यक्रममाश्रित्याग्नेयधर्मा
नुष्ठानानन्तरमनुष्ठीयते तदासर्वेषामाग्नेयधर्मसान्नाय्यधर्माणांएकैकेनविजातीयेनव्यवधानंभवति ।
आग्नेयधर्माणां स्वप्रधानेनसहसान्नाय्यधर्मैर्व्यवधानात्सान्नाय्यधर्माणांचस्वप्रधानेनसहाग्नेयानुष्ठानेनव्यव
धानादितिनविप्रकर्षः तस्मान्मुख्यक्रमः प्रवृत्तिक्रमाद्बलवान् सहप्रयुज्यमानेषुप्रधानेषुसन्निपातिनाम
ङ्गानामारभ्यानुष्ठानेकर्तव्येद्वितीयादिपदार्थानांप्रथमानुष्ठितपदार्थक्रमादयःक्रमः प्रवृत्तिक्रमः यथा

उ
२८

प्राजापत्येष्टिषु प्राजापत्याः वैश्वदेवीं कृत्वा प्राजापत्येष्टिं नीतिगतो नन्तरमेवापादिनीर्दशानां सेतिकर्तव्यसमकाल-
कर्तृकालत्वेन विहिताः अत एषां करणानां चोपाकरणनियोजनसम्भवतीनां साहित्यं संपादनीयं तत्र प्राजाप-
त्यानां संप्रतिपन्नदेवताकत्वेनैकस्मिन्काले अनुष्ठानादुपपद्यते साहित्यं न त्वैन्द्राग्नानां चैकस्मिन्काले अनुष्ठानसम्भ-
वात्तदयनेकेषां पश्वनामुपाकरणमेकस्मिन्काले कर्तव्यं एवं अतस्तेषां साहित्ये अव्यवधानेनानुष्ठानात्सं-
पाद्यमेकस्योपाकरणं कृत्वापरस्योपाकरणमिति अतः प्राजापत्येष्वेकपदार्थं सर्वेष्वनुष्ठाय द्वितीयः पदा-
र्थोनुष्ठेयः तत्र प्रथमपदार्थानुष्ठानेकस्मादितिप्रयोगारम्भकर्तव्यो द्वितीयस्तु पदार्थेन क्रमेण प्रथमोनुष्ठि-
तस्तेनैवानुष्ठेयः प्रयोगविधिश्च गतस्यामिथ्यासाहित्यस्योपपन्नत्वे प्रयोगविधिविनाहित्येन तैरगानां उ-
पाकरणनियोजनादीनां मिथः साहित्यमानेनपर्यायपर्यायविहितं न च साहित्यं स्वनीयपश्वेणावरस्केन-
प्राप्तं तस्य प्राप्तिरेकत्वेनैन्द्रात्वविकृतिष्वात्त स्वनीयाद्युपकारस्याहितेष्वप्राप्तं समानकालत्वसामान्यान्त-
नेमाश्च प्राजापत्येषु प्राप्तं गतानां सामान्यात्प्राजापत्येषु च प्रतिपन्नयागभेदाद्धोरस्काभिधाने अत ऋषेरस्का-
कत्वपक्षेगभनानां उपाकरणनियोजनादीनां साहित्यमानेनपर्यायपर्यायप्राप्तं अत एकस्यपश्वोरुपाक-
रणानंतरमेव नियोजनं चोरस्कवलात्कर्तव्यमेव प्राप्तं तत्त्वं तक्रियते समस्तववचनावगमसर्वपश्वाराम।

राम.
२८

हिंसाद्युपपत्तेः अनेकस्मिन् पशावुपाकरणे कृते न तस्यैव नाशेनैकस्यैव प्राप्त सर्वेषामपि पश्चान्नियोजनं न क्रिय
ते प्रथमस्य तु तेनैव सान्यपश्चाच्चेतु पशोरन्यस्योपाकरणमेव क्रियते कृते न तु नैव पशूपाकरणं प्रथमस्य प्रथमतो नियो-
जनस्य तदीयोपाकरणेन व्यवधाने प्रमाणाभावात् प्रथमस्य प्राप्तस्यैव नियोजनं कार्यं अनन्तरेण क्रमेण
पाकरणं कृतेनैव क्रमेण नियोजनं कार्यं एवं च तन्त्रत्वमपि करणानां सर्वनियोजनेऽस्तु संख्याभ्यां
त्वेकैकस्य यान्तेऽभवति अन्यथा केषांचित्स्वसंनिध्यवधाने केषांचिद्दूरव्यवधानं स्यात् न च तत्र युक्तं तत्साधनं
क्रमेण प्रथमः पदार्थोऽनुष्ठितस्तेनैव द्वितीयोऽनुष्ठेयः तन्त्रितं प्रथमानुष्ठितपदार्थक्रमाद्यो द्वितीयप-
दार्थक्रमः स प्रवृत्तिक्रमः इति तदेवं संक्षेपतो निरूपितः षड्विधक्रम इति निरूपितो न प्रयोगव्यापारः फलस्वा-
मित्वबोधको विधिरधिकारविधिः फलस्वाम्यं च कर्मजन्यफलभोक्तृत्वं स च यजेत स्वर्गकाम इत्येवं-
रूपः अनेन हि स्वर्गानुद्दिश्य यागं विदधता स्वर्गकामस्य यागजन्यफलभोक्तृत्वं प्रतिपाद्यते यस्मा हि
नाग्रस्य ग्रहस्य हानं हुतेऽसोमायत्ता भवने छाकपाले पुरोडाशे निर्वपेद्धिरण्यहि भित्वाग्निस्वाहा होतिनिमित्तेकर्म वि
रण्यादि निमित्तवतः कर्मजन्यपापक्षयरूपफलस्वाम्यं प्रतिपाद्यते तच्च फलस्वाम्यं नैसेव योग्याधिकारि
विशेषणविशिष्टः अधिकारी विशेषणं च तत्रैव यत्तत्स्वविशेषणं नेन प्राप्तं अनवद्य राजा राजेन ह

येन स्वर्गकामो यजेतेत्यनेन स्वर्गजनकत्वं हिरण्यगर्भत्वं विरचनादिना स्वर्गस्य कामयमानत्वस्पष्टनस्कलमो
ऽर्थं प्रतिपादयते। किंच रागतः सन्न स्वर्गकामस्य किंचित् पुरुषविशेषणत्वेनाश्रुतमप्यधिकारिविशे।
षणं भवति यथाध्ययनविधिसिद्धविद्या अग्निसाध्येषु कर्मस्वाधानसिद्धाग्निवत्त्वं सामर्थ्यं च।
एतेषां पुरुषविशेषणत्वेनाश्रवणेऽपि अधिकारिविशेषणत्वं समस्तेषु कर्मविधीनां तथा।
देयत्रकर्मावेनाध्ययनविधिसिद्धत्वान्त्वं नेयमेव प्रतिपत्तेः। अग्निसाध्यकर्मसु चान्वयेतत्वेन
नहि वीर्यं ज्ञाधानसिद्धाग्निवत्त्वं नेयमेव प्रतिपत्तेः। अत एव च शूद्रस्य न यागादावधिकारः। न ह्यध्ययन
विधिसिद्धज्ञानाभावात् आधानसिद्धाग्न्यभावाच्च अध्ययनस्योपनीताधिकारत्वात्। उपनय
नस्य चाष्टवर्षं ब्राह्मणमुपनयीतेत्यादिना त्रैवर्णिकाधिकारत्वात्। आधानस्यापि वसन्ते ब्राह्मणो
ऽग्नीनादधीतेत्यादिना त्रैवर्णिकाधिकारत्वात्। यद्यपि च वर्षासु रथकारोऽग्नीनादधीतेत्यनेन रथका।
रस्याधानमापाततः पर्यायवशाधानं विहितं योगारूढेर्बलीयस्त्वात्। तथापि नास्मात्कर्मस्वधिकारः।
अध्ययनविधिसिद्धज्ञानाभावात्। न च तस्याधानेऽपि कथमधिकारः न रत्नज्ञानस्य तस्याध्य।
नास्तीति वाच्यं तस्याध्ययनविधिसिद्धज्ञानाभावेऽपि वर्षासु रथकारोऽग्नीनादधीतेत्यनेन वि।

पितः ध्यानमात्रेणाधिकस्य त्रैवर्णिकत्वात् अन्यथाध्ययनस्यैव विधेरनुपपत्तेः अतश्चाध्ययनस्य ध्यान
मात्रेऽधिकारेऽपि नैमित्तिककर्मस्वधिकारो विद्याभावात् एवं च नराधानेनाग्निसंस्कारार्थं संस्कृता॰
नामग्नीनामुत्पत्तेरन्यत्रोपयोगाभावात् किं च नराधाने लौकिकाग्निग्रहणे विद्यानिष्पादन
स्वर्गफलं च स्वतंत्रमेव प्रधानकर्म विधीयते अग्नीनिति द्वितीयासङ्गत्यनुपपत्तौ नीति नवरत्नौ॰
गार्थेति प्रकृतमनुसरामः नमिद्धेश्वस्य अध्ययनविधिसिद्धिर्ज्ञानाभावादध्ययनसिद्धा अभावाच्च
नैमित्तिककर्मस्वधिकार इति नवैवं स्त्रियः अधिकारो न स्यान्न स्याः अध्ययनप्रतिषेधेन न हि विसिद्ध
ज्ञानाभावात् उच्यते नास्त्येवेति यावज्जीवं यजेत स्वर्गकामः इत्यादौ स्वर्गकामपदस्याहेतुत्व समर्पकत्वेन तु॰
त्वस्योद्देश्यविशेषणत्वात् यद्येकत्वं च स्वविवक्षितत्वेन स्त्रियः अधिकारस्याधिनत्वादिति चेत्॰
सत्यं अधिकारः साधितो न तु स्वातंत्र्येण स्त्रीसाहचर्यं नीत्यादिनानस्यानिषिद्धत्वात् स्वातं॰
त्र्येण कर्तृत्वे प्रयोगद्वयस्यापि वैगुण्यापत्तेश्च यजमानप्रयोगे पत्नीकर्तृकस्यावेक्षणादिलोपात्
पत्नीप्रयोगे च यजमानकर्तृकस्यावेक्षणादिलोपात् अतो दंपत्योः सहाधिकारः सहाधिकारे
यजमानविप्रयोगे पत्न्या अधिकारासिद्धेर्नेत्राने विनानस्याधिकारोऽनुपपत्तिः पाणिग्रहणा

सहत्वे कर्मस्व नयागुणफलेष्विति वचनेनान्वियः अधिकारानिर्णयाच्च निषादस्थपतेरिवाध्ययनविधिसि
द्धज्ञानविरहिणोपि एतया निषादस्थपतिं याजयेदिति वचनान्निषादेष्टिः निषादस्थपतिशब्दे हि निषा
देचासौ स्थपतिश्चेति कर्मधारयेण न तु निषादानां स्थपतिरिति षष्ठीतत्पुरुषः षष्ठ्यर्थे लक्षणापत्तेः एतावांस्तु
विशेषः निषादस्याध्ययनविधिसिद्धज्ञानाभावेनैनस्यैव विधेस्तत्कर्मोपयिकज्ञानाक्षेपकत्वं पत्न्यास्तु ज्ञा
नस्य ज्ञानाभावेपि यजमानेन सहाधिकारात्तस्य वचनादध्ययनाभावेनैव तत्तस्याः कार्यसिद्धेर्नोत्तरक्रतु
विधीनां ज्ञानाक्षेपकत्वं येन तु पत्नीमात्रकर्तृकाः पदार्थाः आज्यावेक्षणादयस्तत्र ज्ञानं विना शक्यानुष्ठाना इति
न हि धीनां न ज्ञानाक्षेपकत्वं स्त्रीक्रियत इति न सिद्धेऽध्ययनविधिसिद्धज्ञानस्याधानसिद्धाग्निवनायाश्चोत्तर
कर्मस्वधिकारिविशेषणत्वं एवं सामर्थ्यस्याप्यधिकारिविशेषणत्वं असमर्थस्य प्रतिविध्यग्रहणेः आज्ञा
तास्ता असर्वथा भुवनाशक्तिः सहकारिणीति निरपायात् न च सामर्थ्यं काम्यकर्मणामेव प्रधानविषयमत्वेनास
मर्थः प्रधानमात्रसमर्थस्य काम्येष्वधिकारे प्रधानविधिरङ्गानि च एकवाक्यतापन्नस्य साङ्गकर्मसमर्थप्रयो
गग्रहणेः यथाविनियोगमधिकारात् यदि समर्थप्रयोगग्रहणे काम्यविक्रमाविरोधः स्यात् न त्वसम
र्थस्याप्यधिकारः स्यात् न च विरोधो हि सर्वकाम्यकर्मस्वेतेः समर्थप्रयोगग्रहणे विरोधाभावात् प्रकृत

समर्थ्यं प्रतिपद्यते प्रधानविधेरंगवाक्यैकवाक्यतापन्नस्य प्रतिपन्नसंगसाहित्यस्य यागादेः नियतक्र-
मकत्वानास्मरणानां पाक्षिकत्वप्रसंगाच्च अतः सांगप्रयोगस्य समर्थस्यैव कामकर्मण्यधिकारः नित्यक
र्मस्वेवं तेषु यथाशक्ति न्यायः नाधिक्रियत इति जीव यावज्जीवकर्तव्यत्वेन चोदितानि न च याव
ज्जीवं केनापि सांगः प्रयोगः कर्तुं शक्यत इति अतो नित्यकर्मसु प्रधानमात्रसमर्थोधिकारीत्युक्तं नित्यका
दैनिककर्मप्राकं नैमित्तिकार्यो लौकिकानां तु यथाशक्ति विधिः प्रयुक्तानन्तरं फलस्वाम्यबोध
को विधिरधिकारविधिरिति निरूपितं च तद्विधिभेदनिरूपणेन विधिः प्रयोजनवत्पर्यवसं च
सानं मंत्राणां च प्रयोगसमवेतार्थस्मारकत्वं यार्थवत्वेन तदुच्चारणमदृष्टार्थं हि स्यात् संभवति गृह्
मस्या यायामान नचदृष्टस्य प्रकारान्तरेणापि संभवात् मंत्रस्थानम नर्थकं मंत्रैरेव स्मर्तव्यमिति नि
यमविधावाश्रयणात् साधनत्वं हि यस्य प्राप्ताप्नोत्यन्यतः प्राप्यात्वनस्यामनाप्राप्यायां विधिः सनि
व सविधिः यथाहुः विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीय
ते इति अस्यार्थः यस्य पदार्थस्य प्रमाणान्तरेणाप्राप्तस्य तदर्थत्वेन यो विधिः स अपूर्वविधिः यथा
यजेत स्वर्गकाम इत्यादिः यागस्य हि स्वर्गार्थत्वेन प्रमाणान्तरेणाप्राप्तत्वे किं नु अनेनैव विधिना विधी

वत्यप्राप्ते विधिः पक्षे प्राप्तस्य नियमो विधिः नियमविधिः यथा व्रीहीनवहन्तीत्यादिः अनेन हि विधि-
नावघातस्य नैयम्यमर्थं बोध्यते अन्यप्रवृत्तिकेऽसिद्धत्वान्न किं तु नियमः स चाप्राप्तांशपूरण एव
नेष्यसहितानेकोपायसाध्यत्वाद्यस्मात्तारणत्वं अवघातेन परितोऽप्राप्तितो दृहीनमारम्भेनेन सारणा-
यां अवघातस्य प्राप्तेन नहि यदा नाम्नक सप्रमाणपूरणं भवानेन विधिना क्रियते अतश्च नियमवि-
धौ अप्राप्तांशपूरणात्मको नियमएव वाक्यार्थः पक्षे अप्राप्तस्य प्रापणादवघातविधावनियमितिपावक-
अपूर्वविधावितरवैलक्षण्यमपि यागविधानमिति उभयस्य युगपत्प्राप्तावितरव्यावृत्तिपरो विधिः सप-
रिसंख्याविधिः यथा पंचपंचनखा भक्ष्या इति इत्यादिवाक्यं न भक्षणविधिः रागतः प्राप्तत्वात् ना-
पि नियमपरः पंचनखापंचनखभक्षणस्य युगपत्प्राप्तेः पक्षेऽप्राप्त्यभावात् अतः इतरपंचनखभक्षणनि-
वृत्तिपरमिति भवति परिसंख्याविधिः स च परिसंख्याविधिः श्रौतो लाक्षणिकश्चेति तत्र श्रौतो-
यथा ... परिसंख्याप्रकारे ... तिरिक्ताचैषाहृन्नेरनभिधानात् पंचपंचनखा भक्ष्या
इत्यत्र लाक्षणिकी इतरनिवृत्तिवाचकस्य पदस्याभावात् अतएवैतस्मिन्दोषत्रयता दोषत्रयं च श्रुत-
हानिरश्रुतकल्पना प्राप्तबाधश्च श्रुतस्य पंचनखभक्षणस्य हानात् अश्रुतापंचनखभक्षणनिषे-

डे
१२

31

राम
१२

ननामधेयस्यानीलशब्दवत्सामानाधिकरण्यं किंतर्हि वैश्वदेव्यामिक्षेत्यत्रामिक्षापदवद्वैश्वदेवीशब्द
स्यापि देवतात्वानिर्दिष्टत्वात्तद्धितस्य हि साऽस्य देवतेति सर्वनाम्नार्थस्मरणात्सर्वनाम्नश्चोपस्थितविशे
षवाचित्वेन विशेषपरत्वं तत्र कासौ वैश्वदेवीशब्दोपात्तो विशेषः इत्यपेक्षायां आमिक्षापदसान्निध्यादा
मिक्षारूपो विशेषः स्वीक्रियते यथाहुः आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः आमिक्षापदसा
न्निध्यात्तस्यैव विधेयार्पणमिति तथाच वैश्वदेवीपदस्यार्थः सर्वनाम्ना प्रतीयमानस्तद्धितेनैव व्या
णमेकवाक्यत्वेनेति तस्माद्यथा वैश्वदेवीशब्दोपात्तविशेषसमर्पकत्वेनामिक्षापदस्य वैश्वदेवीशब्देन सा
मानाधिकरण्यं एवं सामान्यस्य विधेयत्वाद्यागस्य न यागविशेषसमर्पकत्वेन नामधेयस्य यजिना
सामानाधिकरण्यं नन्विदं नामधेयानां विधेयार्थपरिच्छेदकतयार्थवत्त्वं यथाहुः यागविशेषसिद्धेः
तदधीनत्वादिति नामधेयत्वं च निमित्तचतुष्टयात् मत्वर्थलक्षणाभयाद्वाक्यभेदभयात्तत्प्रख्यशास्त्रा
त्तद्व्यपदेशाच्चेति तत्रोद्भिदा यजेत पशुकाम इत्यत्रोद्भिदादिशब्दस्य यागनामधेयत्वं मत्वर्थलक्षणाभयात्
तथाहि उद्भिच्छब्दस्य गुणसमर्पकत्वे यागस्य च वाक्यान्तरेणाप्राप्तत्वाद्गुणविधानं गुणवत्त्वेन फलपरानर्थक्यापत्तेः नचा
नेन वाक्येन फलं प्रति यागविधानं न सिद्ध्यागुणविधानं गुणस्य वाक्यभेदापत्तेः नापि गुणफलसंबन्धवि

धात्वंसंभवनिपातपरार्थविधानेन निष्क्रयार्थविधानात्पक्षेः धात्वर्थस्यास्य स्वरूपेणाविधानात् न तूद्देशेन वा
श्रवणस्य करणस्य चिरविधानात् धातोस्त्वेन प्रागर्थापेक्षस्य पश्चादनर्थकापेक्षस्य नहि निरपेक्षेण करणसमर्पणेन
गुणस्य करणत्वेनान्वयात् नापि फलपरत्वेनाख्यातेनान्वयात् अपि तु गुणफलसंबन्धविधाने यागस्याश्रय
त्वेन संबन्ध इति वेदयमेनेत्याश्रयवाचकपदाभावात् अर्थसिद्धत्वेन करणत्वमिवाश्रयत्वमपि लभ्यते वि
निवेश आश्रयत्वादेव यागकारणत्वसत्त्वेन लक्षणयापवगुणत्वात् फलायविधीयमानत्वात् फला
यविधीयमानो गुणो यत्र कारकनामापद्यते सम्प्राप्यस्तत्वं चाश्रयत्वं करणत्वं च निष्क्रयार्थात्किंचिल्ला
नं किंच गुणफलसंबन्धविधाने करणीभूतो गुणस्तन्निष्ठं वा करणत्वं फलोद्देशेन विधेयं न त्वाद्येपदेक
रणत्वस्य गुणोपसर्जनत्वेन प्रतीतिर्लक्षणयैव वाच्यास्तृतीयपदाप्रमयार्थत्वात् प्राधान्येनोपस्थितेः एतदि
गुणनिष्ठं करणत्वं फलोद्देशेन विधेयं नत्वपि फलभावनायाः करणत्वेनान्वयो यागगुणनिष्ठकरणत्वोप
स्थितिर्लक्षणयैव वाच्या तत्तृतीयाभिहितस्य करणकारकस्य क्रियायां तत्पयोगस्य करणत्वेनान्वययोगप्रसा
त् करणत्वेनाभिहितेन करणकारकेनानेनान्वययोगः तत्तृतीयाभिहितेन करणगतामान्यस्तृतीयार्था तत्त्व
तीयोत्वभिप्रसङ्गात् अन्यस्य करणत्वेनान्वययोगगुणनिष्ठकरणत्वोपस्थितिर्लक्षणयैव वाच्यास्त

उ
३३

ण्यात्वोपस्थितकारणात्सस्य क्रत्वीयत्वस्य गुणस्य फलभावनायां करणत्वेन रूपितत्वाणेवचाच्छु
